त्वत्कृते मया यानुभूतावस्था । युगसहस्रायमाणः कृच्छ्रेण नीतो दिवसः । प्रसीद सकृदप्यालप दर्शय भक्तवत्सलताम् । ईषदपि विलोकय । पूरय मे मनोरथम् । आर्तास्मि । भक्तास्मि । अनुरक्तास्मि । अनाथास्मि । बालास्मि । अगतिकास्मि । दुःखितास्मि । अनन्यशरणास्मि । मदनपरिभूतास्मि । किमिति न करोषि दयाम् । कथय किमपराद्धं किं वा नानुष्ठितं मया । कस्यां वा नाज्ञायामादृतम् । कस्मिन्वा त्वदनुकूले नाभिरतम् । येन कुपितः । दासीजनमकारणात्परित्यज्य व्रजन्नबिभेषि कौलीनात् । अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया याहमद्यापि प्राणिमि । हा हतास्मि मन्दभागिनी । कथं मे न त्वं न तातो न विनयो न बन्धुवर्गो न परलोकः । धिङ्मां दुष्कृतकारिणीं यस्याः कृते तवेयमीदृशी दशा वर्तते । नास्ति मत्सदृशी नृशंसहृदया याहमेवंविधं भवन्तमुत्सृज्य गृहं गतवती । किं मे गृहेण । किमम्बया । किं वा तातेन । किं बन्धुभिः । किं परिजनेन । हा कमुपयामि शरणम् । अयि दैव निर्घृण दर्शय दयाम् । विज्ञापयामि त्वाम् । देहि दयितदक्षिणाम् । भगवति भवितव्यते कुरु कृपाम् । पाहि वनितामनाथाम् । भगवत्यो वनदेवताः प्रसीदत प्रयच्छतास्य प्राणान् । अम्ब वसुंधरे सकललोकानुग्रहजननि किमर्थं नानुकम्पसे । तात कैलासेश शरणं गतास्मि ते । दर्शय दयालुताम् । इत्येतानि चान्यानि च व्याक्रोशन्ती कियद्वा स्मरामि । ग्रहगृहीतेवाविष्टेवोन्मत्तेव भूतोपहतेव व्यलपम् । तज्जीवितायैवात्ममरणाय स्पृहयन्ती मृतस्यापि सर्वात्मना हृदयं प्रवेष्टुमिवेच्छन्ती करतलेन कपोलयोराश्यानचन्दनश्वेतजटामूले च ललाटे निहितसरसबिसयो-

श्चांसयोर्मलयजरसलवलुलितकमलिनीपलाशावगुण्ठिते च परामृशन्ती पुण्डरीक निष्ठुरोऽस्येवमप्यार्ता न गणयसि मित्युपालभमाना मुहुर्मुहुरेनमन्वनयम्। मुहुः पर्यचुम्बम्। कण्ठे गृहीत्वा व्याक्रोशम्। आः पापे त्वयापि मत्प्रत्यागम यावदस्यासवो न रक्षिता इति तामेकावलीमगर्हयम्। भगवन्प्रसीद प्रत्युज्जीवयैनमिति मुहुर्मुहुः कपिञ्जलस्य प रपतम्। मुहुश्च तरलिकां कण्ठे गृहीत्वा प्रारुदम्। अद्य चिन्तयन्ती न जानामि तस्मिन्काले कुतस्तान्यचिन्तितान्य क्षितान्यनुपदिष्टान्यदृष्टपूर्वाणि मे हतपुण्यायाः कृपणानि च सहस्राणि प्रादुरभवन्। कुतस्ते संलापाः कुतस्तान्यतिकरुण वैक्लव्यरुदितानि।

इत्येवमात्मवृत्तान्तमावेदयन्त्या एव च तस्याः समतिक्र कथमप्यतिकष्टमवस्थान्तरमनुभवन्त्या इव चेतनां जहार मूर्च्छ वेगान्निष्पतन्तीं च शिलातले तां ससंभ्रमप्रसारितकरः परि इव जातपीडश्चन्द्रापीडो विधृतवान्। अश्रुजलार्द्रेण च त येनैवोत्तरीयवल्कलप्रान्तेन शनैः शनैर्वीजयन्संज्ञां ग्राहितवा उपजातकारुण्यश्च बाष्पसलिलोत्पीडेन प्रक्षाल्यमानकपोलयु लब्धचेतनामवादीत्। भगवति मया पापेन तवायं पुनरभिनव मुपनीतः शोको येनेदृशीं दशामुपनीतासि। तदलमनया कथय संह्रियतामियम्। अहमप्यसमर्थः श्रोतुम्। अतिक्रान्तान् संकीर्त्यमानान्यनुभवसमां वेदनामुपजनयन्ति सुहृज्जनस्य दुःखा तन्नार्हसि कथंकथमपि विधृतानिमानसुलभानसून्पुनः पुनः स्म शोकानलेन्धनतामुपनेतुमिति।

एवमुक्ता दीर्घमुष्णं च निश्वस्य बाष्पायमाणलोचना सनि

ीत् । राजपुत्र या तस्यामतिदारुणायां हतनिशायामेभिर्नृशंसैरसुभिर्न परित्यक्ता सेदानीं परित्यज्यत इति दूरापेत‌् । नूनमपुण्योपहताया पापाया मम भगवानन्तकोऽपि परिदर्शनम् । कुतश्च मे कठिनहृदयायाः शोकः । सर्वमिदमस्य दुरात्मनः शठहृदयस्य । सर्वथाहमनेन त्यक्तत्रपेण त्रपाणामग्रेसरीकृता । यया चाधिगतमदनवेदनया वज्रमय्येभूतं तस्याः का गणना कथनं प्रति । किं वापरमतः कष्टाख्येयमन्यद्भविष्यति यन्न शक्यते सोढुमाख्यातुं वा । केवल वज्रपातस्यानन्तरमाश्चर्यं यदभूत्तदावेदयामि । आत्मनश्च धारणकारणलव इवाव्यक्तो यः समुत्पन्नस्तं च कथयामि । दुराशामृगतृष्णिकया गृहीताहमिदमुपरतकल्पं परकीयमिव भूतमप्रयोजनमकृतज्ञं च हतशरीरं वहामि तदलं श्रूयताम् । तश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया तत्तद्बहुविलप्य कामब्रवम् । अभ्युत्तिष्ठ निष्ठुरहृदये कियद्रोदिषि । काष्ठात्य विरचय चितामनुसरामि जीवितेश्वरमिति । अत्रान्तरे ति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य महाप्रमाणः पुरुषो ुरुषलक्षणोपेतो दिव्याकृतिरैरावतकरपीवराभ्यां बाहुभ्यां रतमुत्क्षिप्य दुन्दुभिनादगम्भीरेण स्वरेण वत्से महाश्वेते परित्याज्यास्त्वया प्राणाः पुनरपि तवानेन सह भविष्यति गमः । इत्येवमादृतः पितेवाभिधाय सहैवानेन गगनतलतत् । अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका ुखी किमिदमिति कपिञ्जलमपृच्छम् । असौ तु ससंभ्रमवोत्तरमुदतिष्ठत् । दुरात्मन्नन्तक क्व मे वयस्यमपहृत्य सीत्यभिधायोन्मुखः संजातकोपो बध्नन्सावेगमुत्तरीयवल्कलेन

परिकरमुत्पतन्तं तमेवानुसरन्नन्तरिक्षमुदगात् । पश्यन्त्या एव मे सर्व एव ते तारागणमध्यमविशन् ।

मम तु तेन द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमने द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम् । किंकर्तव्यतामूढा तरलिकामब्रवम् । अयि न जानासि किमेतदिति । सा तदवलोक्य स्त्रीस्वभावकातरतया तस्मिन्क्षणे शोकाभिभावि भयेनाभिभूता वेपमानाङ्गयष्टिर्मम मरणशङ्कया च वराकी विषण्णहृदया सकरुणमवादीत् । भर्तृदारिके न जानामि पाप कारिणी । किं तु महदिदमाश्चर्यम् । अमानुषाकृतिरेष पुरुषः समाश्वासिता चानेन गच्छता सानुकम्पं पित्रेव भर्तृदारिका प्रायेण चैवंविधा दिव्याः स्वप्नेष्यविसंवादिन्यो भवन्त्याकृतयः किमुत साक्षात् । न चाल्पमपि विचारयन्ती कारणमस मिथ्याभिधाने पश्यामि । अतो युक्तं विचार्यात्मानमस्मात्प्राण परित्यागव्यवसायान्निवर्तयितुम् । अतिमहत्खल्विदमाश्वासनस्थान मस्यामवस्थायाम् । अपि च तमनुसरन्गत एव कपिञ्जलः तस्माच्च कुतोऽयं को वायं किमर्थं वानेनायमपगतासुरुत्क्षिप नीतः क्व वा नीतः कस्माच्चासंभावनीयेनामुना पुनः समागमाशा प्रदानेन भर्तृदारिका समाश्वासितेति सर्वमिदमुपलभ्य जीवि वा मरणं वा समाचरिष्यसि । अदुर्लभं हि मरणमध्यवसितम् पश्चादप्येतद्भविष्यति । न च जीवन्कपिञ्जलो भर्तृदारिकामदृ स्थास्यति । तेन तत्प्रत्यागमनकालावधयोऽपि तावद्ध्रियन्ता ममी प्राणाः । इत्यभिदधाना पादयोर्मे न्यपतत् । अहं तु सकल लोकदुर्लङ्घ्यतया जीविततृष्णायाः क्षुद्रतया च स्त्रीस्वभावस्य तथ तद्वचनोपनीतया दुराशामृगतृष्णिकया कपिञ्जलप्रत्यागमनकांक्षया

तस्मिन्काले तदेव युक्तं मन्यमाना नोत्सृष्टवती जीवितम् । शया हि किमिव न क्रियते । तां च पापकारिणीं काल- त्रेप्रतिमां वर्षसहस्रायमाणां यातनामयीमिव दुःखमयीमिव कमयीमिवाग्निमयीमिवोत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना कणधूसरैरश्रुजलार्द्रकपोलसंदानितैर्विमुक्तव्याकुलैः शिरोरुहै- रुद्धमुखी निर्दयाक्रन्दजर्जरस्वरक्षयक्षामेण कण्ठेन तस्मिन्नेव स्तीरे तरलिकाद्वितीया क्षपां क्षपितवती ।

प्रत्यूषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चया तत्प्रीत्या मेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां हीत्वा बुद्ध्वा निःसारतां संसारस्य ज्ञात्वा च मन्दपुण्यता- त्मनो निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानामाक- घ्य दुर्निवारतां शोकस्य दृष्ट्वा च निष्ठुरतां दैवस्य चिन्तयित्वा तिबहुलदुःखतां स्नेहस्य भावयित्वा चानित्यतां सर्वभावाना- वधार्य चाकाण्डभङ्गुरतां सर्वसुखानामविगणय्य तातमम्बां च रित्यज्य सह परिजनेन सकलबन्धुवर्गं निवर्त्य विषयसुखेभ्यो नः संयम्येन्द्रियाणि गृहीतब्रह्मचर्या देवं त्रैलोक्यनाथमनाथ- रणमिमं शरणार्थिनी स्थाणुमाश्रितवत्यस्मि । अपरेद्युश्च कुतोऽपि मुपलब्धवृत्तान्तस्तातः सहाम्बया सहबन्धुवर्गेणागत्य सुचिरं ताक्रन्दस्तैस्तैरुपायैरभ्यर्थनाभिश्च बहुभिरुपदेशैश्चानेकप्रकारैः सान्त्वनैश्च नानाविधैर्गृहगमनाय मे महान्तं यत्नमकरोत् । दा च नेयमस्माद्व्यवसायात्कथंचिदपि शक्यते व्यावर्तयितुमिति निश्चयमधिगतवांस्तदा निराशोऽपि दुस्त्यजतया दुहितृस्नेहस्य पुनः पुनर्मया विसृज्यमानोऽपि बहून्दिवसान्स्थित्वा सशोक एवान्त- र्दह्यमानहृदयो गृहानयासीत् । गते च ताते ततः प्रभृति देवस्या-

श्रुमोक्षमात्रेण किल कृतज्ञतां दर्शयन्ती तदनुरागकृशमिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायाससहस्रनिवासं दग्धशरीरकं बहुविधैर्नियमशतैः शोषयन्ती वन्यैश्च फलमूलवारिभिर्वर्तमाना जपव्याजेन तद्गुणगणानिव गणयन्ती त्रिसन्ध्यमत्र सरसि स्नानमुपस्पृशन्ती प्रतिदिनमर्चयन्ती देवं त्र्यम्बकमस्यामेव गुहायां तरलिकया सह दीर्घं शोकमनुभवन्ती सुचिरं न्यवसम्। साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च नृशंसा च गर्हणीया निष्प्रयोजनोत्पन्ना निष्फलजीविता निर्नाथा निरवलम्बना निःसुखा च। किं मया दृष्टया पृष्टया वा कृतब्राह्मणवधमहापातकया करोति महाभागः। इत्युक्त्वा पाण्डुना वल्कलोपान्तेन शशिनमिव शरन्मेघशकलेनाच्छाद्य वदनं दुर्निवारबाष्पवेगमपारयन्ती निवारयितुमुन्मुक्तकण्ठमतिचिरमुच्चैः प्रारोदीत्।

चन्द्रापीडस्तु प्रथममेव तस्या रूपेण विनयेन दाक्षिण्येन मधुरालापतया निःसङ्गतया चातितपस्वितया च प्रशान्तत्वेन च निरभिमानतया च महानुभावत्वेन च शुचितया चोपारूढगौरवोऽभूत्। तदानीं तु तेनापरेण दर्शितसद्भावेन स्ववृत्तान्तकथनेन तया च कृतज्ञतया हृतहृदयः सुतरामारोपितप्रीतिरभवत्। आर्द्रीकृतहृदयश्च शनैः शनैरेनामभाषत। भगवति क्लेशभीरुरकृतज्ञः सुखासङ्गलुब्धो लोकः स्नेहसदृशं कर्मानुष्ठातुमशक्तो निष्फलेनाश्रुपातमात्रेण स्नेहमुपदर्शयन्रोदिति। त्वया तु कर्मणैव सर्वमाचरन्त्या किमिव न प्रेमोचितमाचेष्टितं येन रोदिषि। तदर्थमाजन्मनःप्रभृति समुपचितपरिचयः प्रेयानसंस्तुत इव परित्यक्तो बान्धवजनः। संनिहिता अपि तृणावज्ञयावधीरिता विषयाः। विमुक्तान्यतिशयितसुनासीरसमृद्धीन्यैश्वर्यसुखानि।

गृहीतं ब्रह्मचर्यम् । आयोजितस्तपसि महत्यात्मा । वनिताजनदुष्करमतिकष्टमङ्गीकृतमरण्यावस्थानम् । अपि चानायासेनैवात्मा दुःखाभिहतैः परित्यज्यते । महीयसा तु यत्नेन गरीयसि क्लेशे निक्षिप्यते केवलम् । यदेतदनुमरणं नाम तदतिनिष्फलम् । अविद्वज्जनाचरित एष मार्गः । मोहविलसितमेतत् । अज्ञानपद्धतिरियम् । मौर्ख्यस्खलितमिदम् । यदुपरते पितरि भ्रातरि सुहृदि भर्तरि वा प्राणाः परित्यज्यन्ते । स्वयं चेन्न जहति न परित्याज्याः । अत्र हि विचार्यमाणे स्वार्थ एव प्राणपरित्यागोयमसह्यशोकवेदनाप्रतीकारत्वादात्मनः । उपरतस्य तु न कमपि गुणमावहति । न तावत्तस्यायं प्रत्युज्जीवनोपायः । न धर्मोपचयकारणम् । न शुभलोकोपार्जनहेतुः । न निरयपातप्रतीकारः । न दर्शनोपायः । न परस्परसमागमनिमित्तम् । अन्यामेव स्वकर्मफलपरिपाकोपचितामसाववशो नीयते भूमिम् । असावप्यात्मघातिनः केवलमेनसा संयुज्यते । जीवंस्तु जलाञ्जलिदानादिना बहूपकरोत्युपरतस्यात्मनश्च । मृतस्तु नोभयस्यापि । स्मर तावत्प्रियामेकपत्नीं रतिं भगवति भर्तरि मकरकेतौ हरनयनहुतभुजा दग्धेप्यविरहितामसुभिः । उत्तरां च विराटदुहितरं बालां बालशशिनीव नयनानन्दहेतौ विनयवति विक्रान्ते च पञ्चत्वमभिमन्यावुपगतेऽपि धृतदेहाम् । अन्याश्च रक्षःसुरासुरमुनिमनुजसिद्धगन्धर्वकन्यका भर्तृरहिताः श्रूयन्ते सहस्रशो विधृतजीविताः ।

प्रोन्मुच्येतापि जीवितं संदिग्धोऽप्यस्य समागमो यदि स्यात् । भगवत्या तु ततः पुनः स्वयमेव समागमसरस्वती समाकर्णिता । अनुभवे च को विकल्पः । कथं च तादृशानामप्राकृताकृतीनां

महात्मनामवितथगिरां गरीयसापि कारणेन गिरं वैतथ्यमास्पदं कुर्यात् । उपरतेन च सह जीवन्त्या कीदृशी समागतिः । अतो निःसंशयमसावुपजातकारुण्यो महात्मा पुनः प्रत्युज्जीवनार्थमेवैनमुत्क्षिप्य सुरलोकं नीतवान् । अचिन्त्यो हि महात्मनां प्रभावः । बहुप्रकाराश्च संसारवृत्तयः । चित्रं च दैवम् । आश्चर्यातिशययुक्ताश्च तपःसिद्धयः । अनेकविधाश्च कर्मणां शक्तयः । अपि च सुनिपुणमपि विमृशद्भिः किमिवान्यत्तदपहरणे कारणमाशङ्क्येत जीवितप्रदानादृते । न चासंभाव्यमिदमवगन्तव्यं भगवत्या । चिरप्रवृत्त एष पन्थाः । तथा हि । विश्वावसुना गन्धर्वराजेन मेनकायामुत्पन्नां प्रमद्वरां नाम कन्यामाशीविषविलुप्तजीवितां स्थूलकेशाश्रमे भार्गवस्य नप्ता प्रमतितनयो मुनिकुमारको रुरुर्नाम स्वायुषोऽर्धेन योजितवान् । अर्जुनं चाश्वमेधतुरगानुसारिणमात्मजेन बभ्रुवाहननाम्ना समरशिरसि शरापहृतप्राणमुलूपी नाम नागकन्यका सोच्छ्वासमकरोत् । अभिमन्युतनयं च परीक्षितमश्वत्थामास्त्रपावकपरिप्लुष्टमुदरादुपरतमेव निर्गतमुत्तराप्रलापोपजनितकृपो भगवान्वासुदेवो दुर्लभानसून्प्रापितवान् । अत्रापि कथंचिदेवमेव भविष्यति । तथापि किं क्रियते । क उपालभ्यते । प्रभवति हि भगवान्विधिः । बलवती च नियतिः । आत्मेच्छया न शक्यमुच्छ्वसितुमपि । अतिपिशुनान्यस्यैकान्तनिष्ठुरस्य दैवहतकस्य विलसितानि न क्षमन्ते दीर्घकालमव्याजरमणीयं प्रेम । प्रायेण च निसर्गत एवानायतस्वभावभङ्गुराणि सुखान्यायतस्वभावानि च दुःखानि । तथा हि । कथमप्येकस्मिञ्जन्मनि समागमो जन्मान्तरसहस्राणि च विरहः प्राणिनाम् । अतो नार्हस्यनिन्द्यमात्मानं निन्दितुम् । आपतन्ति हि संसारपथ-

मतिगहनमवतीर्णमेते वृतान्ताः। धीरा हि तरन्त्यापदम् । इत्येवंविधैरन्यैश्च मृदुभिरुपसान्त्वनैः संस्थाप्य तां पुनरपि निर्झरजलेनाञ्जलिपुटोपनीतेनानिच्छन्तीमपि बलात्प्रक्षालितमुखीमकारयत्।

अत्रान्तरे च श्रुतमहाश्वेतावृत्तान्तोपजातशोक इव समुत्सृष्टदिवसव्यापारो रविरपि भगवानधोमुखतामयासीत् । अथ क्षीणे दिवसे महाश्वेता मन्दमन्दमुत्थाय भगवतीमुपास्य पश्चिमां सन्ध्यां कमण्डलुजलेन प्रक्षालितचरणा वल्कलशयनीये सखेदमुष्णं च निःश्वस्य निषसाद । चन्द्रापीडोऽप्युत्थाय सकुसुमं प्रस्रवणजलाञ्जलिमवकीर्य कृतसंध्याप्रणामस्तास्मिन्द्वितीये शिलातले मृदुभिर्लतापल्लवैः शय्यामकल्पयत्। उपविष्टश्च तस्यां पुनः पुनस्तमेव मनसा महाश्वेतावृत्तान्तमभावयत् । आसीच्चास्य मनसि। एवं नामायमप्रतीकारदारुणो दुर्विषहवेगः कष्टः कुसुमायुधो यदनेनाभिभूता महान्तोऽप्येवमनपेक्षितकालक्रमाः समुत्सारितधैर्याः सद्यो जीवितं जहति। सर्वथा नमो भगवते त्रिभुवनाभ्यर्चितशासनाय मकरकेतनायेति । पुनः पप्रच्छ चैनाम् । भगवति सा तव परिचारिका वनवासव्यसनमित्रं दुःखसब्रह्मचारिणी तरलिका क गतेति ।

अथ साकथयत् । महाभाग यत्तन्मया कथितममृतसंभवमप्सरसां कुलं तस्मान्मदिरेति नाम्ना मदिरायतेक्षणा कन्यकाभूत्। तस्याश्च देवश्चित्ररथः पाणिमग्रहीत्। अपरिमितगुणगणाकृष्टहृदयश्चान्यवनितादुर्लभेन महादेवीशब्देन परं प्रीतः प्रसादमकरोत् । अन्योन्यप्रेमसंवर्धनपरयोश्च तयोर्यौवनसुखानि सेवमानयोः कालेनाश्चर्यभूतमेकजीवितमिव पित्रोरथवा सर्वस्यैव गन्धर्वकुलस्य

वा जीवलोकस्य दुहितृरत्नमुदपादि कादम्बरीति नाम्ना । सा च मे जन्मतः प्रभृत्येकासनशयनपानाशना परं प्रेमस्थानमखिलविश्रम्भधाम द्वितीयमिव हृदयं बालमित्रम् । एकत्र तया मया च नृत्यगीतादिकलासु कृताः परिचयाः । शिशुजनोचिताभिश्च क्रीडाभिरपनीतो बालभावः । सा चामुनैव मदीयेन हतवृत्तान्तेन समुपजातशोका निश्चयमकार्षीत् । नाहं कथंचिदपि सशोकायां महाश्वेतायामात्मनः पाणिं ग्राहयिष्यामीति सखीजनस्य पुरतः सशपथमभिहितवती च । यदि कथमपि मामनिच्छन्तीमपि बलात्तातः कदाचित्कस्मैचिद्दातुमिच्छति तदाहमनशनेन वा हुताशनेन वा रज्ज्वा वा विषेण वा नियतमात्मानमुत्स्रक्ष्यामीति । सर्वं च तदात्मदुहितुः कृतनिश्चयं निश्चलभाषितं कर्णपरम्परया परिजनसकाशाद्गन्धर्वराजश्चित्ररथः स्वयमशृणोत् । गच्छति काले समुपारूढनिर्भरयौवनामालोक्य सुतां बलवदुपतापपरवशः क्षणमपि न धृतिमलभत । एकापत्यतया चातिप्रियतया च न शक्तः किंचिदपि तामभिधातुमित्यपश्यंश्चान्यदुपायान्तरमिदमत्र प्राप्तकालमिति मत्वा तया महादेव्या मदिरया सहावधार्य क्षीरोदनामानं कञ्चुकिनं वत्से महाश्वेते त्वद्व्यतिरेकेणैव दग्धहृदयानामिदमपरमस्माकमुपस्थितमिदानीं तु कादम्बरीमनुनेतुं त्वं शरणमिति संदिश्य मत्समीपमद्यैव प्रत्यूषसि प्रेषितवान् । ततो मया गुरुवचनगौरवेण सखीप्रेम्णा च क्षीरोदेन सार्धं सा तरलिका सखि कादम्बरि किं दुःखितमपि जनमतितरां दुःखयसि जीवन्तीमिच्छसि चेन्मां तत्कुरु गुरुवचनमवितथमिति संदिश्य विसर्जिता । नातिचिरंगतायां च तस्यामनन्तरमेवेमां भूमिमनुप्राप्तो महाभागः । इत्यभिधाय तूष्णीमभवत् ।

अत्रान्तरे भगवांस्तारकाराज उदगात् । क्रमेण चोद्गते शशाङ्कमण्डले चन्द्रापीडस्सुप्तामालोक्य महाश्वेतां पल्लवशयने शनैः समुपाविशत्। अस्यां वेलायां किं नु खलु मामन्तरेण चिन्तयति वैशम्पायनः किं वा वराकी पत्रलेखा किं वा राजपुत्रलोक इति चिन्तयन्नेव निद्रां ययौ। अथ क्षीणायां क्षपायामुषसि संध्यामुपास्य शिलातलोपविष्टायां महाश्वेतायां निर्वर्तितप्राभातिकविधौ चन्द्रापीडे तरलिका षोडशवर्षवयसा सावष्टम्भाकृतिना राजकुलसंपर्कचतुरेण गन्धर्वदारकेण केयूरकनाम्नानुगम्यमाना प्रत्यूषस्येव प्रादुरासीत् । आगत्य च कोऽयमित्युपजातकुतूहला चन्द्रापीडं सुचिरमालोक्य महाश्वेतायाः समीपमुपसृत्य कृतप्रणामा सविनयमुपाविशत्। अनन्तरं चातिदूरानतेनोत्तमाङ्गेन प्रणम्य केयूरकोऽपि महाश्वेतादृष्टिनिसृष्टं नातिसमीपवर्ति शिलातलं भेजे। समुपविष्टश्च तमदृष्टपूर्वं रूपातिशयं चन्द्रापीडस्य दृष्ट्वा विस्मयमापेदे।

परिसमाप्तजपा तु महाश्वेता पप्रच्छ तरलिकाम्। किं त्वया दृष्टा प्रियसखी कादम्बरी कुशलिनी। करिष्यति वा तदस्मद्वचनमिति। अथ सा तरलिका विनयावनतमौलिर्मधुरया गिरा व्यजिज्ञपत्। भर्तृदारिके दृष्टा खलु मया भर्तृदारिका कादम्बरी सर्वतः कुशलिनी विज्ञापिता च निखिलं भर्तृदुहितुः संदेशम्। आकर्ण्य च यत्तया रुदित्वा प्रतिसंदिष्टं तदेष तयैव विसर्जितस्तस्या एव वीणावाहकः केयूरकः कथयिष्यति। इत्युक्त्वा विरराम । विरतवचसि तस्यां केयूरकोऽब्रवीत् । भर्तृदारिके महाश्वेते देवी कादम्बरी दृढदत्तकण्ठग्रहा त्वां विज्ञापयति। यदियमागत्य मामवदत्तरलिका तत्कथय किमयं गुरुजनवचना-

नुरोधः किमिदं मच्चित्तपरीक्षणं किं गृहनिवासापराधनिपुणोपालम्भः किं प्रेमविच्छेदाभिलाषः किं भक्तजनपरित्यागोपायः किं वा प्रकोपः। जानास्येव मे सहजप्रेमनिष्पन्दनिर्भरं हृदयम्। एवमतिनिष्ठुरं संदिशन्ती कथमसि न लज्जिता। तथा मधुरभाषिणी केनासि शिक्षिता वक्तुमप्रियम्। स्वस्थोऽपि तावत्क इव सहृदयः कनीयस्यवसाननिरसे कर्मणीदृशे मतिमुपसर्पयेत्। किमुतातिदुःखाभिहतहृदयोऽस्मद्विधो जनः। सुहृद्दुःखखेदिते हि मनसि कैव सुखाशा कैव निर्वृतिः कीदृशाः संभोगाः कानि वा हसितानि। येनेदृशीं दशामुपनीता प्रियसखी कथमतिदारुणं तमहं विषमिवाप्रियकारिणं कामं सकामं कुर्याम्। अपि च यत्र भर्तृविरहविधुरापहृतपरपुरुषदर्शना दिवानिशं निवसति प्रियसखी कथमिव तन्मम हृदयमपरः प्रविशेज्जनः। यत्र च भर्तृविरहविधुरा तीव्रव्रतकर्षिताङ्गी प्रियसखी महत्कृच्छ्रमनुभवति तत्राहमवगणय्यैतत्कथमात्मसुखार्थिनी पाणिं ग्राहयिष्यामि। कथं वा मम सुखं भविष्यति। त्वत्प्रेम्णा चास्मिन्वस्तुनि यया कुमारिकाजनविरुद्धं स्वातन्त्र्यमालम्ब्याङ्गीकृतमयशः समवधीरितो विनयो गुरुजनवचनमतिक्रान्तं न गणितो लोकापवादो वनिताजनस्य सहजमाभरणमुत्सृष्टा लज्जा सां कथय कथमिव पुनरत्र प्रवर्तते। तदयमञ्जलिरुपरचितः प्रणामोऽयमिदं च पादग्रहणम्। अनुगृहाण माम्। वनमितो गतासि मे जीवितेन सह। इति मा कृथाः स्वप्नेऽपि पुनरिममर्थं मनसि। इत्यभिधाय तूष्णीमभूत्।

महाश्वेता तु तच्छ्रुत्वा सुचिरं विचार्य गच्छ स्वयमेवाहमागत्य यथार्हमाचरिष्यामीत्युक्त्वा केयूरकं प्राहिणोत्। गते च

केयूरके चन्द्रापीडमुवाच । राजपुत्र रमणीयो हेमकूटः । चित्रा च चित्ररथराजधानी । बहुकुतूहलः किंपुरुषविषयः । पेशलो गन्धर्वलोकः । सरलहृदया महानुभावा च कादम्बरी । यदि नातिखेदकरमिव गमनं कलयसि नावसीदति वा गुरुप्रयोजनमदृष्टपूर्वविषयकुतूहलि वा चेतो मद्वचनमनुरुध्यते वा भवन्मतिः सुखदायि वास्मच्चिरदर्शनमर्हसि वा प्रणयमिममप्रत्याख्यानयोग्यं वा जनं मन्यसे समारूढो वा परिचयलेशोऽनुग्राह्यो वायं जनस्ततो नार्हसि निष्फलां कर्तुमभ्यर्थनामिमाम् । इतो मयैव सह गत्वा हेमकूटमतिरमणीयतानिधानं तत्र दृष्ट्वा च मन्निर्विशेषां कादम्बरीमपनीय तस्याः कुमतिमनोमोहविलसितमेकमहर्विश्रम्य श्वोभूते प्रत्यागमिष्यसि । मम हि निष्कारणबान्धवं भवन्तमालोक्यैव दुःखान्धकारभाराक्रान्तेन महतः कालादुच्छ्वसितमिव चेतसा श्रावयित्वा स्ववृत्तान्तमिमं सह्यतामिव गतः शोकः । दुःखितमपि जनं रमयन्ति सज्जनसमागमाः । परसुखोपपादनपराधीनश्च भवादृशां गुणोदयः । इत्युक्तवतीं चैनां चन्द्रापीडोऽब्रवीत् । भगवति दर्शनात्प्रभृति परवानयं जनः कर्तव्येषु यथेष्टमशङ्कितया नियुज्यताम् । इत्यभिधाय तया सहैवोदचलत् ।

क्रमेण च गत्वा हेमकूटमासाद्य गन्धर्वराजकुलं समतीत्य काञ्चनतोरणानि सप्तकक्षान्तराणि कन्यान्तःपुरद्वारमवाप । महाश्वेतादर्शनप्रधावितेन दूरादेव कृतप्रणामेन कनकवेत्रलताहस्तेन प्रतीहारजनेनोपदिश्यमानमार्गः प्रविश्यासंख्येयनारीशतसहस्रसंबाधं स्त्रीमयमपरमिव जीवलोकमियत्तां ग्रहीतुमेकत्र त्रैलोक्यस्त्रैणमिव संहृतमपुरुषमिव सर्गान्तरं कुमारः कुमारीपुराभ्यन्तरं ददर्श ।

तस्य चैवंविधस्य किंचिदभ्यन्तरमतिक्रम्येतश्चेतश्च परिभ्रमतः कादम्बरीप्रत्यासन्नस्य परिजनस्य शुश्राव तांस्तानतिमनोहरानालापान् । तान्छृण्वन्नेव कादम्बरीभवनसमीपमुपययौ । अथ सेवार्थमागतेनोभयत ऊर्ध्वस्थितेन स्त्रीजनेन प्राकारेणेव लावण्यमयेन कृतदीर्घरथ्यामुखाकारं मार्गमद्राक्षीत् । तन्मध्ये च श्रीमण्डपं ददर्श । तत्र च मध्यभागे पर्यन्तरचितमण्डलोपविष्टेन चानेकसहस्रसंख्येन कन्यकाजनेन परिवृत्तां समीपे संमुखोपविष्टं कोऽसौ कस्य वापत्यं किमभिधानो वा कीदृशं तस्य रूपं कियद्वा वयः किमभिधत्ते भवता किमभिहितः कियच्चिरं दृष्टस्त्वया कथं चास्य महाश्वेतया सह परिचय उपजातः किमयमत्रागमिष्यतीति मुहुर्मुहुश्चन्द्रापीडसंबद्धमेवालापं तद्रूपवर्णनामुखरं केयूरकं पृच्छन्तीं कादम्बरीं ददर्श । ः

तस्य तु दृष्टकादम्बरीवदनचन्द्रलेखालक्ष्मीकस्य सागरस्येवामृतमुल्ललास हृदयम् । आसीच्चास्य मनसि । शेषेन्द्रियाण्यपि मे वेधसा किमिति लोचनमयान्येव न कृतानि । किं वानेन कृतमवदातं कर्म चक्षुषा यदनिवारितमेनां पश्यति । अहो चित्रमेतदुत्पादितं वेधसा सर्वरमणीयानामेकं धाम । कुत एते रूपातिशयपरमाणवः समासादिताः । तन्नूनमेनामुत्पादयतो विधेः करतलपरामर्शक्लेशेन ये विगलिता लोचनयुगलादश्रुबिन्दवस्तेभ्य एतानि जगति कुमुदकमलकुवलयसौगन्धिकवनान्युत्पन्नानीति । एवं चिन्तयत एवास्य तस्या नयनयुगले निपपात चक्षुः । तदा तस्या अपि नूनमयं स केयूरकेणावेदित इति चिन्तयन्त्या रूपातिशयविलोकनविस्मयस्मेरं निश्चलनिबद्धलक्ष्यं चक्षुस्तस्मिन्सुचिरं पपात ।

कादम्बरी तु कृच्छ्रादिव दत्तकतिपयपदा महाश्वेतां स्नेहनिर्भरं चिरदर्शनजातोत्कण्ठां कण्ठे जग्राह । महाश्वेतापि दृढतरदत्तकण्ठग्रहा तामवादीत् । सखि कादम्बरि भारते वर्षे राजा तारापीडो नाम । तस्यायं चन्द्रापीडो नाम सूनुर्दिग्विजयप्रसङ्गेनानुगतो भूमिमिमाम् । एष च दर्शनात्प्रभृति प्रकृत्या मे निष्कारणबन्धुतां गतः । परित्यक्तसकलसंगनिष्ठुरामपि मे सविशेषैः स्वभावसरलैर्गुणैराकृष्य चित्तवृत्तिं वर्तते । दुर्लभो हि दाक्षिण्यपरवशो निर्निमित्तमित्रमकृत्रिमहृदयो विदग्धजनः । यतो दृष्ट्वैवेममहमिव त्वमपि निर्माणकौशलं प्रजापतेर्ज्ञास्यसीति बलादानीतोऽयम् । कथिता चास्य मया बहुप्रकारं प्रियसखी । तदपूर्वदर्शनोऽयमिति विमुच्य लज्जामनुपजातपरिचय इत्युत्सृज्याविश्रम्भतामविज्ञातशील इत्यपहाय शङ्कां यथा मयि तथात्रापि वर्तितव्यम् । एष ते मित्रं च बान्धवश्च परिजनश्च इत्यावेदिते तया चन्द्रापीडः प्रणाममकरोत् ।

कादम्बरी तु सविभ्रमकृतप्रणामा महाश्वेतया सह पर्यङ्के निषसाद । ससंभ्रमपरिजनोपनीतायां च शयनशिरोभागनिवेशितायां पीठिकायां चन्द्रापीडः समुपाविशत् । त्वरितपरिजनोपनीतेन च सलिलेन कादम्बरी स्वयमुत्थाय महाश्वेतायाश्चरणौ प्रक्षाल्योत्तरीयांशुकेनापमृज्य पुनः पर्यङ्कमारुरोह । चन्द्रापीडस्यापि कादम्बर्याः सखी रूपानुरूपा जीवितनिर्विशेषा सर्वविश्रम्भभूमिर्मदलेखेति नाम्ना बलादनिच्छतोऽपि प्रक्षालितवती चरणौ । महाश्वेता त्वंसदेशे सप्रेम पाणिना स्पृशन्ती कादम्बरीमनामयं पप्रच्छ । सा तु सखीप्रेम्णा गृहनिवासेन कृतापराधेवानामयेनैव लज्जमाना कृच्छ्रादिव कुशलमाचचक्षे । मुहूर्तापगमे च ताम्बूलदानो-

घर्ता महाश्वेता तामभाषत । सखि कादम्बरि सर्वाभिरेवास्माभिरभिनवागतश्चन्द्रापीड आराधनीयः । तदस्मै तावद्दीयताम् । इत्युक्ता च किंचिद्विवर्तितावनतमुखी शनैरव्यक्तमिव प्रियसखि लज्जेऽहमनुपजातपरिचया प्रागल्भ्येनानेन गृहाण त्वमेवास्मै प्रयच्छेत्युवाच कादम्बरी ताम् । पुनः पुनरभिधीयमाना च तया कथमपि ग्राम्येव चिराद्दानाभिमुखं मनश्चक्रे । महाश्वेतामुखादनाकृष्टदृष्टिरेव वेपमानाङ्गयष्टिरामुकुलितलोचना प्रसारयामास ताम्बूलगर्भं हस्तपल्लवम् । चन्द्रापीडस्तु जयकुञ्जरकुम्भस्थलास्फालनसंक्रान्तसिन्दूरमिव स्वभावपाटलं प्रसारितवान्पाणिम् । तत्र च सा वेपथुचालितवलयावलीकेन संभाषणमिव कुर्वता हस्तेन स्वेदसलिलपातपूर्वकं गृह्यतामयं मन्मथेन दत्तो दासजन इत्यात्मानमिव प्रतिग्राहयन्ती ताम्बूलमदात् । गृहीत्वा चापरं ताम्बूलं महाश्वेतायै प्रायच्छत् ।

अत्रान्तरे चागत्य कञ्चुकी महाश्वेतामवोचत् । आयुष्मति देवश्चित्ररथो देवी च मदिरा त्वां द्रष्टुमाह्वयत इति । एवमभिहिता च गन्तुकामा सखि चन्द्रापीडः क्वास्तामिति कादम्बरीमपृच्छत् । असौ तु विहस्यावदत् । सखि महाश्वेते किं त्वमेवमभिदधासि । दर्शनादारभ्य शरीरस्याप्ययमेव प्रभुः किमुत भवनस्य विभवस्य परिजनस्य वा । यत्रास्मै रोचते प्रियसखीहृदयाय वा तत्रायमास्तामिति । तच्छ्रुत्वा महाश्वेता तदत्रैव त्वत्प्रासादसमीपवर्तिनि प्रमदवने क्रीडापर्वतकमणिवेश्मन्यास्तामित्यभिधाय गन्धर्वराजं द्रष्टुं ययौ । चन्द्रापीडोऽपि तया सहैव निर्गत्य विनोदनार्थं गीतकलाकुशलाभिः कन्यकाभिरनुगम्यमानः पूर्वदृष्टेन केयूरकेणोपदिश्यमानमार्गः क्रीडापर्वतमणिमन्दिर-

मगात् । गते च तस्मिन्गन्धर्वराजपुत्री विसर्ज्य सकलं सखीजनं परिजनं च परिमितपरिचारिकाभिरनुगम्यमाना प्रासादमारुरोह । तत्र च शयनीये निपत्यादूरस्थिताभिः परिचारिकाभिर्विनोद्यमाना समचिन्तयच्चैनम् । अदृष्टपूर्वोऽयमिति साहसिकया मया न शङ्कितम् । दर्शनानुकूलाहमस्य नेति वा तरलया न कृतो विचारक्रमः । गुरुजनान्न त्रस्तम् । लोकापवादान्नोद्विग्नम् । तथा च महाश्वेता दुःखितेति निर्दाक्षिण्यया नोपलक्षितम् । स्थूलबुद्धयोऽपि तादृशीं विनयच्युतिं विभावयेयुः किमुतानुभूतमदनवृत्तान्ता महाश्वेता सकलकलाकुशलाः सख्यो वा । सर्वथा हतास्मि मन्दपुण्या । मरणं मेद्य श्रेयो न लज्जाकरं जीवितम्। श्रुत्वैतं वृत्तान्तं किं वक्ष्यत्यम्बा तातो वा गन्धर्वलोको वा । न खलु जानामि मन्दभागिन्युत्सन्नमन्मथेन वा पूर्वकृतापुण्यसंचयेन वान्येन वा केनाप्ययमानीतो मम विप्रलम्भकश्चन्द्रापीडः । यस्य दर्शनमात्रेणव समर्पितेव मन्मथेन विक्रीतेव हृदयेनोपकरणीभूतास्मि । न मे कार्यं तेन चपलेन । इति क्षणमिव संकल्पमकरोत् । कृतसंकल्पा तु निर्भर्त्सितेव मनोभुवा पुनरपि तथैव चन्द्रापीडाभिमुखहृदया बभूव । तदेवमस्तमितप्रतिसमाधानबला बलात्प्रेमावेशेनास्वतन्त्रीकृता परवशेवोत्थाय जालवातायनेन तमेव क्रीडापर्वतमवलोकयन्त्यतिष्ठत् । तत्रस्था च सा तमानन्दजलव्यवधानोद्विग्नेव स्मृत्या ददर्श न चक्षुषा । तत्संगमकालातिपातासहेव मनो गमागमाय नियुक्तवती न परिजनम् ।

चन्द्रापीडोऽपि प्रविश्य स्वच्छं कादम्बरीहृदयमिव द्वितीयं मणिगृहं शिलातलास्तीर्णायामुभयत उपर्युपरि निवेशितबहूपधानायां कुथायां निपत्य केयूरकेणोत्सङ्गे गृहीतचरणयुगलस्ताभि-

यथादिष्टेषु भूमिभागेषूपविष्टाभिः कन्यकाभिः परिवृतो दोलायमानेन चेतसा चिन्तां विवेश । प्रायेण मानुष्यकसुलभा लघुता मिथ्यासंकल्पसहस्रैरेवमायास्य मां विप्रलभते लुप्तविवेको यौवनमदो मदयति मदनो वा । किमनेन वृथैव मनसा खेदितेन । यदि सत्यमेवेयं धवलेक्षणा मय्येवं जातवृत्तिस्तदा न चिरात्स एवैनामप्रार्थितानुकूलो मन्मथः प्रकटीकरिष्यति । स एवास्य संशयस्य च्छेत्ता भविष्यति । इत्थमवधार्योत्थायोपविश्य च ताभिः कन्यकाभिस्तैस्तैरालापैः सुकुमारैः कलाविलासैः क्रीडन्नासांचक्रे । मुहूर्तं च स्थित्वा निर्गम्योपवनालोकनकुतूहलाक्षिप्तचित्तः क्रीडापर्वतकशिखिरमारुरोह ।

कादम्बरी तु तं दृष्ट्वा चिरयतीति महाश्वेतायाः किल वर्त्मावलोकयितुं विमुच्य तं गवाक्षमनङ्गक्षिप्तचित्ता सौधस्योपरितनं तलमारुरोह । तत्र च विरलपरिजना मुहुर्मदलेखां सखीं परिष्वज्य मुहुः परिजनान्तरितसकलदेहा विहस्य तं विलोकयन्ती तेन च विलोक्यमाना महान्तमपि कालमतिक्रान्तं नाज्ञासीत् । आरुह्य च प्रतीहारीनिवेदितमहाश्वेताप्रत्यागमना तस्मादवततार । स्नानादिषु मन्दादरापि महाश्वेतानुरोधेन दिवसव्यापारमकरोत् । चन्द्रापीडोऽपि तस्मादवतीर्य प्रथमविसर्जितेनैव कादम्बरीपरिजनेन निर्वर्तितस्नानविधिर्निरुपहतशिलातलार्चिताभिमतदैवतः क्रीडापर्वतक एव सर्वमाहारादिकमहःकर्म चक्रे ।

क्रमेण च कृताहारः क्रीडापर्वतकप्राग्भाजि मनोहारिणि मरकतशिलातले समुपविष्टो दृष्टवान्सहसैवातिबहलधाम्ना धवलेनालोकेन जलेनेव निर्वाप्यमाणं दिवसम् । कुतूहलाच्चालोका-

नुसारप्रहितचक्षुरद्राक्षीदनल्पकन्यकाकदम्बपरिवृतां तमालिकयानुगम्यमानामागच्छन्तीं मदलेखां तस्याश्च समीपे तरलिकां तया च सितांशुकोपच्छदे पटलके गृहीतं प्रभावर्षिणमतितारं हारम् । दृष्ट्वा चायमस्य चन्द्रापीडश्चन्द्रातपद्युतिमुषो धवलिम्नः कारणमिति मनसा निश्चित्य दूरादेव प्रत्युत्थानादिना समुचितोपचारक्रमेण मदलेखामापतन्तीं प्रतिजग्राह । सा तु तस्मिन्नेव मरकतग्रावणि मुहूर्तमुपविश्य स्वयमुत्थाय तेन चन्दनाङ्गरागेणानुलिप्य ते च द्वे दुकूले परिधाप्य तैश्च मालतीकुसुमदामभिरारचितशेखरं कृत्वा तं हारमादाय चन्द्रापीडमुवाच । कुमार तवेयमपहस्तिताहंकारकान्ता पेशलता प्रीतिपरवशं जनं कमिव न कारयति । त्वन्मूर्तिरेवात्रोपालम्भमर्हति या प्रथमदर्शन एव विश्रम्भमुपजनयति । इतरथा हि त्वद्विधे सकलभुवनप्रथितमहिम्नि प्रयुज्यमानं सर्वमेवानुचितमाभाति । अपि च स्वयंगृहीतहृदयाय किं दीयते । जीवितेश्वराय किं प्रतिपाद्यते । प्रथमकृतागमनमहोपकारस्य का ते प्रत्युपक्रिया । दर्शनदत्तजीवितफलस्य सफलमागमनं केन ते क्रियते । प्रणयितां चानेन व्यपदेशेन दर्शयति कादम्बरी न विभवम् । अप्रतिपाद्या हि परस्वता सज्जनविभवानाम् । आस्तां तावद्विभवः । भवादृशस्य दास्यमप्यङ्गीकुर्वाणा नाकार्यकारिणीति नियुज्यते । दत्त्वात्मानमपि वञ्चिता न भवति । जीवितमप्यर्पयित्वा न पश्चात्तप्यते । प्रणयिजनप्रत्याख्यानपराङ्मुखी च दाक्षिण्यपरवती महत्ता सताम् । न च तादृशी भवति याचमानानां यादृशी ददतां लज्जा । यत्सत्यममुना व्यतिकरेण कृतापराधमिव त्वय्यात्मानमवगच्छति कादम्बरी । तदयममृतमथनसमुद्भूतानां सर्वरत्नानामेकः शेष

इति शेषनामा हारोऽमुनैव हेतुना बहुमतो भगवताम्भसां पत्या गृहमुपगताय प्रचेतसे दत्तः । पाशभृतापि गन्धर्वराजाय गन्धर्वराजेनापि कादम्बर्यै तयापि त्वद्वपुरस्यानुरूपमाभरणस्येति विभावयन्त्या नभस्तलमेवोचितं सुधासूतेर्धाम न धरेत्यवधार्यानुप्रेषितः। यद्यपि निजगुणगणाभरणभूषिताङ्गयष्टयो भवादृशाः क्लेशहेतुमितरजनबहुमतमाभरणमङ्गेषु नारोपयन्ति तथापि कादम्बरीप्रीतिरत्र कारणम् । किं न कृतमुरसि शिलाशकलं कौस्तुभाभिधानं लक्ष्म्याः सहजमिति बहुमानमाविष्कुर्वता भगवता शार्ङ्गपाणिना । नच नारायणोऽत्र भवन्तमतिरिच्यते । नापि कौस्तुभमणिरणुनापि गुणलवेन शेषमतिशेते । न चापि कादम्बरीमाकारानुकृतिकलयाप्यल्पीयस्या लक्ष्मीरनुगन्तुमलम् । अतोऽर्हतीयमिमं बहुमानं त्वत्तः । न चाभूमिरेषा प्रीतिप्रसरस्य । नियतं च भवता भग्नप्रणया महाश्वेतामुपालम्भसहस्रैः खेदयित्वात्मानमुत्स्रक्ष्यति । अत एव महाश्वेता तरलिकामपीमं हारमादाय त्वत्सकाशं प्रेषितवती । तयापि कुमारस्य संदिष्टमेव । न खलु महाभागेन मनसापि कार्यः कादम्बर्याः प्रणयप्रसरभङ्गः । इत्युक्त्वा च ताराचक्रमिव चामीकराचलस्य तटे तं तस्य वक्षःस्थले बबन्ध ।

चन्द्रापीडस्तु विस्मयमानः सबहुमानं प्रत्यवादीत् । मदलेखे किमुच्यते । निपुणासि । जानासि ग्राहयितुम् । उत्तरावकाशमपहरन्त्या कृतं वचसि कौशलम् । अयि मुग्धे के वयमात्मनः । के वा वयं ग्रहणस्याग्रहणस्य वा । गता खल्वियमस्तं कथा सौजन्यशालिनीभिर्भवतीभिरुपकरणीकृतोऽयं जनो यथेष्टमिष्टेष्वनभीष्टेषु वा व्यापारेषु विनियुज्यताम् । अतिदक्षिणायाः खलु देव्याः कादम्बर्या गुणा न कंचिन्न दासीकुर्वन्ति ।

PREFACE.

When the reader first happens to go over a portion of the well-known *Kâdambarî* of *Bânabhatta,* he is naturally struck with the unrivalled beauty of some of the passages, and as he proceeds, he becomes more and more confirmed in his opinion. The whole narrative is so pathetic, the incidents narrated though so intricate, are so graphically described, that in my humble opinion, the poet can hardly be surpassed, in his almost superhuman power of composition, his command over the language and the happiness of his expressions, by any poet, not only in Sanskrit but even in other languages. But there is one thing in the book which disappoints one who wishes to follow the course of incidents without any break, and that is, the tiresome length of similes, metaphors and antitheses. These long-winding passages can safely be dispensed with without in any way marring the beauty of the work or breaking the chain of events. What I have, therefore, attempted to do in the following pages is to give the reader a sketch of the whole divested of the superfluous portions, transcribing only those portions which I thought necessary for the clear understanding of the whole story. In short, I have made a short narrative out of the whole, fit to be placed in the hands of school-boys and even those who may wish to enjoy the beauty of the work with little labour, and not of those who may have the patience, time and even opportunities, to wade through a host of similes and metaphors, in some cases long even to a fault.

In order to make the book useful, I have given copious explanatory notes on such passages and expressions

as I thought difficult for an ordinary student of Sanskrit to understand, and also a full glossary of words occurring in the extract with their meanings in English.

How far I have succeeded in this my first humble attempt in this direction, I leave it to the Sanskrit reading public to judge, and if any suggestions or corrections as to the meaning of a particular expression be made, they will be most thankfully received.

In conclusion, I have to beg the apology of the readers for the errors that may have crept into the work both in printing and transcription for unavoidable reasons.

Dhulia,
10th March 1885.

M. S. ÂPTE.

PREFACE TO THE SECOND EDITION.

The first edition of this little compilation was brought out in 1885 and the sale of the copies then issued has encouraged me to serve the Sanskrit reading public with a second edition of the same. When the first edition was submitted to the Bombay Educational Department, Dr. Bhandarkar, the well-known Sanskritist on this side of India, was kind enough to go through a portion of the book very carefully and to make some very important suggestions as also to point out some inaccuracies both in the matter and manner of the book. I have, therefore, done my best in this edition to carry out all the suggestions and to remove the inaccuracies so kindly pointed out. I have made some omissions and alterations and have added more explanatory notes on points which I thought were difficult for an ordinary student of Sanskrit to understand. In short, I have gone through the book as carefully as I could.

In conclusion I have to thank Dr. Bhandarkar and such of my friends and well-wishers as were kind enough to extend their patronage to the book and to make suggestions from time to time.

Dhulia,
22nd September 1891. M. S. ÂPTE.

PREFACE TO THE FOURTH EDITION.

This edition is a mere reprint of the former, nothing being added or omitted.

Dhulia, 1914. M. S. ÂPTE.

THE STORY.

——:0:——

There was once a king named *Sûdraka,* who reigned in *Vidishâ,* on the banks of the *Vetravatî.* Once upon a time as he was sitting in his audience-hall attended by his Ministers he was informed that there stood at the gate of the palace a *Chandala* girl with a parrot in a cage which she desired to offer to the king. Whereupon the king ordered her to his presence and when he saw her, he was struck by her exquisite beauty, especially as she was a *Chandala.* In the meantime, her attendant saluted the king and said that the woman was his master's daughter sent to present his Majesty with a parrot, well versed in all *Shastras* and *Vaishampayana* by name. With these words he set the parrot before the king, whom the bird saluted with a verse composed in his honour. While every one was wondering what this might be, the hour of mid-day was announced. The king then ordered the parrot and the girl to be well cared for and after going through all his daily duties, went again to the hall of andience and sent for the parrot, and after asking him how he had fared, requested him to satisfy his curiosity by relating an account of himself from the beginning in detail.

THE PARROT'S TALE.

There is in the *Vindhya* forest the hermitage of *Agastya* and near it a lake, on the western shore of which stands a *S'almali* tree. I was born there and my mother dying of child-labour, I was taken care of by my father and lived happily, till I was one day terrified by the noise of hunting commenced by *Matangaka,* the chief of the *Sabaras,* who rested there for a time and went away without

hurting us. But one of them remained behind, climbed the tree and felled down all the nests of birds and along with them the one in which I lived with my father who soon perished. I fortunately fell on a heap of dry leaves and thence escaping, took shelter under a *tamala* tree; and after the hunter had gone away I was seized by thirst, to satisfy which I tried to go towards the lake, but could not do so as I had no wings on.

At that very moment there came *Harita*, the son of *Jabali* a sage who dwelt in a hermitage hard by, for bathing. When he saw me he took compassion on me and taking me to the lake, forced a few drops of water into my mouth. After bathing he carried me to the hermitage in the presence of *Jabali* and his disciples, who, seeing me, asked *Harita* how he had come by me, and when he had satisfied them, *Jabali* looked intently at me and said that I was reaping the fruits of my own misconduct, and being besought by the sages to explain himself fully he said that he would do so after they had finished their day duties. When the sages anxiously gathered round him again, he went on as follows:—

JABALI'S ACCOUNT OF THE PARROT.

In *Ujjayini*, there reigned a king named *Tarapida*, who having entrusted all his affairs to his minister *Sukanasa*, devoted himself to manly exercises and pleasures. There was only one thing wanting to make his happiness complete. He had no issue. He had a Queen named *Vilasavati*. One day going to her, he found her lying on her couch in great grief. But being unable to get an answer from her, he asked her attendant the cause of the Queen's distress and was told that, that day the Queen having gone to the temple of Siva had heard there that the childless do not get salvation and that a son alone can save the soul from hell.

Hearing this the king sat musing for a time and said that she had no cause to be sorry as every thing depends on fate, but that she might devote herself to the service of Brahmans and Saints, by whose favour many people had been blessed with issue. Then after some expressions of his own regret, he bade her take heart and thus comforted her as best as he could.

As time rolled on, the king once at dawn had a dream in which he saw the moon enter the body of Vilasavati, as she lay asleep on the terrace of the place. Then rising he sent for *Sukanasa* who, being informed of the dream, said that he too had a similar dream in which he had seen a Brahman laying a lotus in the lap of *Manorama,* his wife. He then interpreted the dreams favourably, whereupon they both went to Vilasavati and cheered her with the glad tidings.

Soon after Vilasavati conceived and in due course of time brought forth a son. At the same time Manorama bore a son. The king's son was named *Chandrapida* and the minister's *Vaishampayana.* When the prince had grown up to a lad's estate, the king placed him along with Vaishampayana in a hall of learning prepared outside the city that he might not be addicted to childish plays. Both the lads excelled in every art and manly exercises and there grew up between them so close an intimacy that the one could not be without the other even for a moment.

At length one day, when Chandrapida was sixteen years old the king sent for *Balahaka,* chief of his army and bade him go and bring the prince home. He sent with him a wondrous horse presented to him by the king of the Parasikas. Its name was *Indrayudha,* whom, when the prince saw, he suspected to be some great personage cursed to be so for some offence. He then reluc-

tantly mounted the steed and went through the crowded streets to the palace where he saw the king in the court. Having stayed there for some time he, accompanied by Vaishampayana went and saw the Queen and thence went to the palace destined for him. Next morning the Prince received from his mother *Patralekha* whom she intended to be his personal attendant and she requested him to regard her as a friend rather than a servant.

After a few days, Chandrapida to whom Sukanasa had addressed a speeh full of wise counsel, was installed as Yuvaraja and was then sent on the conquest of the Universe with a suitable army. For three years he wandered over the earth extending his conquests in all directions till once he conquered Suvarnapura, capital of the Kiratas dwelling on Hemakuta.

One day while there, he mounted Indrayudha and set out to hunt. While wandering through the forest he happened to see a pair of Kinnaras, who fled at his sight and Chandrapida pursued them till he was drawn to a distance of fifteen Yojanas. Then marvelling at his own folly, he turned his horse's head and set out to return to his camp; but thinking that he and his horse were in need of rest, he came to the bank of a lake named *Achchhoda.* After resting there for a time, he was about to proceed, when his ears were regaled by the tunes of some celestial music; but looking in the direction of the sounds he could see nothing. Then mounting his steed he went to the northern bank of the lake where he saw a temple of Siva and a maiden of superhuman beauty bending before the image. He then stood gazing on her, admiring her beauty till the song ceased. After the song was over, the maiden made her obeisance to the image of Siva and welcomed Chandrapida, and leading him to her hermitage spread before him her simple fare. After they had rest-

ed, Chandrapida let her know who he was and what had brought him to the place. He then pressed her in return to tell her story, when she fell to weeping bitterly, but controlling herself bade him hear and went on as follows:—

MAHASHVETA'S OWN STORY.

'You must have heard that there are fourteen families of the nymphs. I am the unhappy daughter of Hansa, the chief of a tribe of Gandharvas, my mother Gauri being descended from the moon. They called me Mahas'veta so white was I when born. One day when I came to this lake to bathe and was wandering with my maidens, I was drawn by an odour in a part of the grove, where I saw a young Muni who wore the flower whose fragrance had drawn me thither. When I saw him, love quite subdued me, but thinking that sages are beyond the power of love, I thought of turning and fleeing from the place before he should have noticed me. But alas ! he saw me and it seemed he, too, felt the force of love. When I was able to move I went near his attendant, a second Muni and asked him who the youth was and what might be the wondrous flower that he wore. He smiled at my idle curiosity and told me that Lakshmi herself had become enamoured of a sage named S'vetaketu and straightway bore him a son; that the yonth I admired was that son; that when Lakshmi gave S'vetaketu that son he named him *Pundarika* from the lotus on which Lakshmi was sitting when she caught sight of S'vetaketu, and that that day being the fourteenth they had come to worship S'iva on Kailasa; when the goddess of Nandana forest had herself presented him with the flower. As we talked Pundarika approached us and taking the flower from his ear fixed it in mine. By coming in contact with me he was so much confused that he let fall his rosary of beads. I caught it and put it round my neck. Just then a servant came from my

mother to say that it was time to retire to bathe. I moved away unwillingly, when his friend chid him saying that he should not allow his mind to be taken away by me like the rosary. Then I gave him my necklace for the rosary, but he did not notice the fraud. When I reached my palace I felt very uneasy and gave myself up to this new emotion. While I stood on the terrace of my palace, my female attendant came and informed me that the youth, of whom I was thinking had sent me a message. I then read the message and guessed at once what it meant. In the evening *Kapinjala.* the friend of Pundarika, came to me and said that he had come to confess the truth of his friend's love for me and asked my help. His words filled me with a secret joy; but before I could answer, a visit from my mother was announced and Kapinjala hurriedly departed. After my mother had gone, I thought to myself for a long time and at last set out with *Taralika,* my friend, to meet my lover; but as I went near the place I heard sounds of lamentation, and reaching the spot I saw the lifeless body of Pundarika.'

When she had told so much, she being overcome with emotion fainted away. Chandrapida supported her and brought her to herself and besought her to discontinue the story that so much grieved her, but she went on as follows :-

'I was then resolved to die, when I saw a divine figure coming down from the sky who took up the body of the dead Muni and consoled me, saying that I must live and that I should meet my lover again. So saying he flew up into heaven followed closely by Kapinjala. After that I took to this way of life with the hope of meeting him again according to the promise of the divine figure.'

Chandrapida then told her that instances were not wanting of persons who had been united to their dead

lovers. They then both retired to rest; but Chandrapida, being unable to sleep asked her why Taralika had deserted her. Whereupon he was told she had a dearest friend of hers named *Kadambari,* the daughter of the chief of the second race of Gandharvas, who persisted in her resolve of not marrying till she (Mahashveta) remained single, and that she being entreated by her parents to use her influence with her (Kadambari), she had sent Taralika there. Next morning Taralika appeared attended by a youth named *Keyuraka* and told Mahashveta that Kadambari would by no means be persuaded to change her firm resolve. After a long thought Mahashveta sent Keyuraka back saying that she herself would soon follow. She then invited Chandrapida to go with her if he pleased, and he having readily consented, they both went to Hemakuta. When they went there and Kadambari and Chandrapida came face to face, love entered the hearts of both. After Mahashveta had told Kadambari who the youth was, the latter offered, according to custom, betelnut to Chandrapida who thought she was bestowing her hand on him. He remained there for some time during which they both fell in love with each other completely, and then Chandrapida asked leave to go and revisit his camp. The permission asked for was granted and he was sent with an escort to the camp. There Chandrapida passed a sleepless night and in the morning he was visited by Keyuraka with a necklace which he had forgotten to take with him and also a message from Mahashveta that he should soon return. Then having left Vaishampayana in charge of the camp he made for Hemakuta with Patralekha, and having introduced her to the princess and kept her there, he again took leave and returned.

Returning to the camp he found messengers from his father waiting for him with a letter to say that he should

return soon. He then gave the signal for departure, and before leaving, he enjoined Meghanada to wait at the hermitage with a message to Kadambari to be sent through Keyuraka who, he thought, would escort Patralekha to that place, and leaving Vaishampayana in command of the camp, with orders to follow him slowly he set out for Ujjayini. His arrival filled all with joy but he was uneasy for Kadambari and anxiously waited for the return of Meghanada and Patralekha. In a few days they came and his first care was to take Patralekha aside and put questions to her with regard to her stay with Kadambari. He was then told that Kadambari was very anxious on his account and so he passed his time very miserably till he once said he saw Keyuraka coming. The latter came but brought no message from Hemakuta and told him that very tale which was told by Patralekha; whereupon he was much troubled at heart and waited for Vaishampayana to come and show him the way out of the difficulty. In the morning of the following day he heard that the camp had arrived as far as *Dashapuri* and having sent for Meghanada bade him escort Keyuraka and Patralekha to Hemakuta and sent a message to Kadambari that she should do nothing rash and that he would make no delay in returning. He then went to his father to ask leave to go to meet Vaishampayana when the king hinted that the time had come when he should marry. Glad at heart at the hint, he passed the day any how and at night he set out towards the camp hoping to surprise his friend. He then rode into the camp and asked where Vaishampayana was, but could get no answer. But when the chief men in the camp saw the prince, they besought him to dismount and hear the story they had to tell him and that his friend was not dead as he seemed to suspect.

The story was briefly this:–In obedience to Chandrapida's orders that they should march slowly, Vaishampayana halted at the place for one day; and the next morning he gave the signal to break up the camp, and thinking that they would not be able to see the place again, he invited them to go and bathe in the waters of the lake Achchoda and as they strolled on to the banks of the lake, they became aware of a change that had taken place in Vaishampayana, for he stood motionless before a certain arbour there, until, losing all control over his limbs, he sank down and wept bitterly and seemed like one seeking something lost, that he turned a deaf ear to all their entreaties that he should return, and that therefore, they at last left him there, as he said he could not leave the place at all.

On hearing the strange story the prince was unable to understand the cause of this total absence of all worldly things in Vaishampayana. He thought of getting his father's leave to go in search of his friend and accompanied by him to revisit his love. Under the influence of the mixed emotions he re-entered the city and went to the house of Sukanasa where he heard his father had gone. When he entered and sat down his father hinted that it was some fault in his own son which had caused this strange conduct on the part of Vaishampayana; whereupon Sukanasa protested against the injustice done to the prince and said that his son alone was to blame in the matter. Then through Sukanasa the prince obtained leave from his father to go in search of Vaishampayana. Vilasavati too gave him leave and so in consultation with astrologers for an auspicious day, the prince set out in search of his friend. After going nearly two-thirds of the, journey he saw Meghanada returning, for Paṭralekḥa and Keyuraka,

despairing when the rains came, of the prince's being able to overtake them, had sent him back. Sad at heart the prince went near the lake Achchoda, but nowhere could he find any trace of his friend. He, therefore, went to the hermitage of Mahashveta for news. He found the holy maid weeping bitterly and on inquiry was told by her the following sad tale:—

'When I heard from Keyuraka that you had left Hemakuta, I returned to my hermitage to practise severer austerities. After I returned, I found a young Brahman most resembling you, who gazed about him with vacant looks in search of something he had lost. When he saw me a great change came over him, for he eagerly ran to meet me and said that it was strange that a maid like myself should practise penance, but that I should give myself up to love. After hearing this I went away without even asking him who he was. But some days after I saw the same youth coming near me while I lay sleepless on my couch, and he having crept to my side said that I should save him from the pangs of love which had well-nigh consumed his life. I then cursed him to be a parrot; whereupon he fell on the ground senseless, and it was only then that I knew him to be your friend from his weeping attendants. '

Just when Mahashveta had ended, Chandrapida's heart burst in two, and while all were mingling their lament over the lifeless form of the prince, Kadambari stepped in their midst in a loverlike attire with ornaments and flowers. When she saw the lifeless form of the prince, she fell on the ground and was supported by her attendant Madalekha, while Patralekha too let go the hand of Kadambari and fell down. Even after the princess had come to herself she remained in a strange stupor and ordered Madalekha to prepare the funeral pyre,

and after giving directions to her friends how to dispose of her pet things she sat down with Chandrapida's feet in her lap. Just at the touch there streamed from the body a great light that whitened all the place, and immediately in the sky was heard a voice:—"Child, Mahashveta, again I bid you, be of good cheer. Your Pundarika's body is incorrupt and is in my world. As to this body of the prince, know that the separation of the body and the soul is the effect of a curse and till that curse shall pass away you should guard the body very carefully till the happy meeting."

Hearing this voice all stood amazed except Patralekha who hurriedly ran towards the horse and plunged with him into the lake. As soon as they had disappeared beneath the waters, a young ascetic arose from the lake and running to Mahashveta said:—"Do you know me?" Thus addressed she threw herself at his feet and said:—"Kapinjala, I know you now. Tell me who took Pundarika into heaven and why you did not send me word so long and why you come alone." He then smiled and said:—"He, who took away the body, gave me no answer but followed closely by me went to the world of the moon and said that he was the moon and that that friend of mine, while giving up his life, had cursed him and said that he might in more lives than one endure the pangs of unsuccessful love and that indignant at the outrage, he had said that he should share his joys and sorrows. But that when his anger had passed away, he saw that the person so cursed was the chosen lord of Mahashveta and because they must live in the world of men together he had taken the body where it would be free from corruption and told me to go straight to Shvetaketu, for, said he,his power was great and he might devise a remedy. Now as I passed along the heavenly path I had the

misfortune to run over a choleric Vaimanika who glared at me and said that since I had run over him in the broad path of the heaven, I should be a horse. I then fell at his feet and told him the cause of my distraction and asked his forgiveness. After relenting he said that what he said could not be otherwise, but that the curse should last only till the death of him whose horse I might become. I then requested him to grant me one favour and that was to allow me to be in the company of my friend whom I had lost and who was to be born with the moon in the world of men. After musing a little he said that I should be the horse of the moon who was to be the son of Tarapida. After that I fell into the sea and emerged from it a horse; but I did not forget the past and that is why I brought Chandrapida to this place in pursuit of the Kinnara pair. The youth whom you ignorantly cursed was no other than Pundarika."

Hearing this Mahashveta beat her breast and fell to the ground. But Kapinjala consoled her saying that the greater part of the trial was over and that the curse would soon end. Mahashveta then asked after Patralekha and was told that Kapinjala knew nothing about her after his plunge into the lake and that he was about to proceed to S'vetaketu from whom he hoped to learn where the moon, his friend Pundarika and others were living. With these words he flew up into the sky.

Kadambari and Mahashveta then took counsel together and resolved to wait where they were for the issue of events now confirmed by the story of Kapinjala. With the help of Taralika and Madalekha, Kadambari tended the body and putting off her gay apparel, bathed and clothed herself in white raiment and fasted that day. In the morning assuring herself by inquiries that no change had taken place in the body of

Chandrapida, she called the princes and showed it to them. Thus the little company remained there till the close of the rains. One day Meghanada came to Kadambari and told her that messengers had come from Tarapida inquiring after his son and that to spare Kadambari the pain of receiving them he had told them all that had happened, but that they refused to go unless they had seen Chandrapida with their own eyes. Kadambari then bade him introduce the messengers and when they came before her she desired them to conceal the truth from the King and Queen, but they refused to do so and therefore, she sent with them one Tvaritaka, a follower of the prince, to confirm so incredible a story.

Vilasavati had gone to the temple of the mothers to offer up gifts for her son's safe return, when she was told that the messengers had returned. They being asked said that they had seen the prince and that Tvaritaka would tell the rest. At these words the Queen swooned away, when the king came and raised her up saying that, if some evil had befallen the prince she had no reason to shed tears, but that they would decide what to do after they had heard the messengers out. So saying the king summoned Tvaritaka who began to tell the tale and when he came to speak of the bursting of the heart of the prince, the king said he would hear no more and ordered a funeral pyre to be prepared. But when Tvaritaka besought him to hear the whole account he turned to Sukanasa, who consoled the king by various confirmations of the wondrous story drawn from old legends. The king then resolved to go where the body of his son was and followed by all his people except a few who remained to guard the city, he set out. In a short time, he reached

the lake and sent Tvaritaka to obtain news and the latter soon returned with the prince's attendants. Being reassured by them as to his son's position, he cheered the Queen and went straight to Mahashveta's hermitage. At his sight Mahashveta fled into the interior of the cave and Kadambari swooned away. Vilasavati ran towards the body of the prince and pressed it in close embrace.

The king then told the queen to restore Kadambari to consciousness. After she had done so, the latter saluted the parents of her lover. Then Tarapida thinking that his stay there might interfere with Kadambari's constant care of the body withdrew, and without entering the royal tent, built for himself a hermitage, where he remained awaiting the issue of this strange matter !

THE PARROT AGAIN.

After saying so much Jabali smiled and said that they had now heard how the heavenly being had come to be a parrot. As the sage spoke, the scales fell from my eyes and in everything except the human form, I was again Vaishampayana. Then bending low to the ground I asked the sage where Chandrapida then was that I might fly straight to him, but he chid me for the rashness of my purpose and told me to ask him that question when my wings were grown. But he being requested by Harita to explain how a Muni could so completely fall under the power of love, he reminded him of my birth from Lakshmi without the concurrence of the sage and said that after the life of the parrot, I would obtain an eternal one. The sage then broke up the assembly. Then Harita having placed me on his own couch went to perform his morning duties, and while I was thinking of destroying myself not caring what I might next become, Harita re-entered to tell me that my friend Kapinjala had arrived from my

father. Soon after Kapinjala came in and taking me in his arms wept at my evil plight. Then he told me that my father had begun a work till the completion of which I should remain in the hermitage of Jabali. Then after repeatedly telling me to obey my father's injunctions strictly, Kapinjala left me.

After a few days when I saw that my wings were grown, I flew away towards the north where I thought I might find the body of Chandrapida and also Mahashveta. But I was soon exhausted and compelled to stop. Falling asleep on the bough of a tree, I awoke to find myself caught in a net by a man of the woods who, being asked why he had caught me told me that his mistress, the daughter of the chief of the Pakvanas, had employed him to look for me and that she alone knew what was to be done with me; whereupon I called my father, mother and Kapinjala to rescue me from this great calamity.

He took me to the town of the Pakvanas and delivered me to his mistress who forthwith confined me in a cage. Then I resolved to hold my tongue, for if I were to show my powers of speech, there would be the greater inducement for my confinement.

So time rolled on till I found myself one morning in this golden cage. Your Majesty has seen the Chandala; who she is, why she keeps me a prisoner or why she has brought me here is equally a mystery to me."

After the parrot had ended his history the king summoned the woman to his presence, who came and addressed the king as follows:-"Oh light of the world, you have heard the tale of your own former birth and that of this perverse parrot. He, indeed in this life, as in the former one, sought his love in direct disobedience to his father's commands and it was at his orders that I held him impri-

soned till the work should be accomplished. The time has come and I have brought you together. Now put off these earthly forms and live happily together." So saying she flew up into the sky.

As he listened, the king's heart was full of the hopeless love for Kadambari. One day when the spring had doubled both his and Kadambari's torment, she, unable to restrain herself any longer, threw her arms round the neck of the senseless form of Chandrapida and, strange to say, it revived at her touch.

Her embrace was returned and Chandrapida himself said to her:—"Oh timid one, fear no longer. The touch of your arms has restored me to life. You yourself are sprung from the race born of nectar, and you perhaps remember the promise that this body should owe its freedom from corruption to you. Today the curse is over. I have cast off the body of Sudraka. Now this world and also of the moon are open to you. Pundarika also, to whom Mahashveta had given her heart, is free from his curse."

As he spoke, Pundarika came form the sky in the same form in which he had died for the love of Mahashveta. Seeing him Kadambari ran to Mahashveta with the glad tidings and Keyuraka to Hemakuta and Madalekha to Tarapida and Vilasavati, who saluted the Moon, as at once their son and the Lord of night. The king then presented Punadarika to Sukanasa and Manorama. Then Kapinjala delivered a message from Shvetaketu by which the sage gave up all claims on Punadarika in favour of Sukanasa. The little company spent the night in a loving talk over all the strange past. In the morning parents of Kadambari and Mahashveta arrived from Hemakuta, and at their suggestion they all went to Hemakuta and celebrated both the marriages there with great pomp. One day when

Kadambari inquired after the fate of Patralekha, she was told that she was Rohini, the wife of the moon and that she had gone down to the world of men to share the fate of her husband.

After this long-looked-for union Chandrapida took leave of his parents-in-law and set out for Ujjayini. There he set Pundarika on the throne and himself dwelt with Kadambari now in Ujjayini, now in the world of the moon and now in Hemakuta. Thenceforth they were never separated from each other and lived happily together in supreme and unending felicity.

अथ कादम्बरीसारः

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरश्चतुरुदधिमालामेखलाया भुवो भर्ता चक्रवर्तिलक्षणोपेतश्चक्रधर इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनो हर इव जितमन्मथो गुह इवाप्रतिहतशक्तिः कर्ता महाश्चर्याणामुत्पत्तिः कलानां कुलभवनं गुणानामागमः काव्यामृतरसानामुदयशैलो मित्रमण्डलस्योत्पातकेतुरहितजनस्याश्रयो रसिकानां धौरेयः साहसिकानां वैनतेय इव विनतानन्दजननो राजा शूद्रको नाम ।

नाम्नैव यो निर्भिन्नारातिहृदय एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम् । यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकराः शास्त्रेषु चिन्ताः स्वप्नेषु विप्रलम्भाः शशिकृपाणकवचेषु कलङ्काः सार्यक्षेषु शून्यगृहाः प्रजानामासन् । यस्य च परलोकाद्भयं विवाहेषु करग्रहणमनवरतमखाग्निधूमेनाश्रुपातोऽभूत् ।

तस्य च राज्ञो जलावगाहनावतारितजयकुञ्जरकुम्भसिन्दूरसंध्यायमानसलिलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत् । स तस्यां च विजिताशेषभुवनतया विगतराज्यचिन्ताभारनिर्वृतोऽमात्यैः परिवृतः कालविद्भिः प्रेमानुरक्तहृदयैः केसरिकिशोरकैरिव विक्रमैकरसैरात्मनः प्रतिबिम्बैरिव समानवयोभी राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास ।

तस्य चातिविजिगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यातिरूपवतोऽपि सतः संतानार्थिभिरमात्यैरपेक्षितस्यापि सुरतसुखस्योपरि द्वेष इवासीत् । सत्यपि रूपविलासोपहसितरतिविभ्रमे लावण्यवति विनयवत्यन्वयवति चावरोधजने स कदाचिन्मृगयाव्यापारेण कदाचिच्छास्त्रालापेन कदाचिदाख्यायिकाख्यानेतिहासपुराणाकर्णनेन वनितासंभोगपराङ्मुखः सुहृत्परिवृतो दिवसमनयत् । यथैव च दिवसमेवमारब्धविविधक्रीडापरिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत् ।

एकदा तु नातिदूरोदिते भगवति मरीचिमालिनि राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण संनिहितविषधरेव चन्दनलता भीषणरमणीयाकृतिः राज्याधिदेवतेव विग्रहिणी प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत् । देव दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति । सकलभुवनतलसर्वरत्नानामुदधिरिवैकभाजनं देवो विहंगमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वागताहमिच्छामि देवदर्शनसुखमनुभवितुमित्येतदाकर्ण्य देवः प्रमाणमित्युक्त्वा विरराम ।

उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामवलोक्य मुखानि को दोषः प्रवेश्यतामित्यादिदेश । अथ प्रतीहारी नरपतिवचनानन्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत् । प्रविश्य च सा नरपतिसहस्रमध्यवर्तिनमनेकरत्नाभरणकिरणजालकान्तरितावयवं गगनसिन्धुफेनपटलपाण्डुरस्य नातिमहतो दुकूल-

वितानस्याधस्तादिन्दुकान्तमणिपर्यङ्किकानिषण्णमुद्धूयमानकनकदण्डचामरकलापं स्फाटिके पादपीठे विन्यस्तवामपादममृतफेनधवले दुकूले वसानमतिसुरभिचन्दनानुधवलितोरःस्थलमुपरिविन्यस्तकुङ्कुमस्थासकमिन्द्रनीलकेयूरयुगलेन वेष्टितबाहुशिखरं वारविलासिनीभिः परिवृतममलमणिकुट्टिमसंक्रान्तप्रतिबिम्बतया पतिप्रेम्णा वसुंधरया हृदयेनेवोह्यमानमपरिमितपरिवारजनमप्यद्वितीयमविरतप्रवृत्तदानमप्यमदं राजानमद्राक्षीत् । आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रबोधनार्थमसकृत्सभाकुट्टिममाजघान येन सकलमेव तद्राजकमेकपदे तेन वेणुलताध्वनिना युगपदावलितवदनमवनिपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत् ।

अवनिपतिस्तु दूरादालोकयेत्यभिधाय प्रतीहार्या निर्दिश्यमानां तां वयःपरिणामपाण्डुरशिरसानुगृहीतार्यवेशेन पुरुषेणाधिष्ठितपुरोभागां कनकशलाकानिर्मितमप्यन्तर्गतशुकप्रभाश्यामायमानं मरकतमयमिव पञ्जरमुद्वहता चाण्डालदारकेणानुगम्यमानामागुल्फावलम्बिना नीलकञ्चुकेनावच्छन्नशरीरामुपरि रक्तांशुकरचितावगुण्ठनामतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गङ्गास्रोतसेव कालिन्दीशङ्कया कृतकण्ठग्रहां मूर्च्छामिव मनोहरां निद्रामिव लोचनग्राहिणीमरण्यकमलिनीमिव मातङ्गकुलदूषितामचिरोपरूढयौवनामतिशयरूपाकृतिमनिमिषलोचनो ददर्श ।

दृष्ट्वा च तां समुपजातविस्मयस्याभून्मनसि महीपतेरहो विधातुरस्थाने रूपनिष्पादनप्रयत्नः । धिग्विधातारमसदृशसंयोगकारिणमतिमनोहराकृतिरपि क्रूरजातिजा येनेयमसुरश्रीरिव सततनिन्दितसुरता रमणीयाप्युद्वेजयति । एवमादि चिन्तयन्तमेव

राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम । कृतप्रणामायां च तस्यां मणिकुट्टिमोपविष्टायां स पुरुषस्तं विहंगमादाय पञ्जरगतमेव किञ्चिदुपसृत्य राज्ञे न्यवेदयदब्रवीच्च । देव विदितसकलशास्त्रार्थो राजनीतिप्रयोगकुशलो गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः सकलभुवनतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः सर्वरत्नानामुदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायाता । तदयमात्मीयः क्रियतामित्युक्त्वा नरपतेः पुरो निधाय पञ्जरमसावपससार ।

अपसृते च तस्मिन्विहंगराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणं चरणमतिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो राजानमुद्दिश्यार्यामिमां पपाठ ।

स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ।

राजा तु तां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनमतिमहार्हासनोपविष्टममरगुरुमिवाशेषनीतिपारगं कुमारपालितनामानममात्यमब्रवीत् । श्रुता भवद्भिरस्य विहंगमस्य स्पष्टता वर्णोच्चारणे स्वरे च मधुरता । प्रथमं तावदिदमेवाश्चर्यं यदयमभिव्यक्तमात्रानुस्वारस्वरसंयोगविशेषसंयुक्तामतिपरिस्फुटाक्षरां गिरमुदीरयति । तत्र पुनरपरमभिमतविषये तिरश्चोपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः । तथाह्यनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जयशब्दमियमार्या मामुद्दिश्यातिपरिस्फुटाक्षरं गीता । प्रायेण हि पक्षिणः पशवश्च भयाहारमैथुननिद्रासंज्ञामात्रवेदिनो भवन्ति । इदंतु महच्चित्रमित्युक्त-

वति भूभुजि कुमारपालितः किंचित्स्मितवदनो नृपमवादीत् । देव किमत्र चित्रमेते हि शुकसारिकाप्रभृतयो विहंगविशेषा यथाश्रुतं वाचमुच्चारयन्तीत्यधिगतमेव देवेन । तत्राप्यन्यजन्मोपात्तसंस्कारातिशय उपजायते इति नातिचित्रम् । अन्यच्चैतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाभिधाना वागासीदग्निशापादपरिस्फुटालापता शुकानामुपजाता करिणां च जिह्वापरिवृत्तिरिति । एवमुच्चारयत्येव तस्मिन्नशिशिरकिरणमम्बरतलस्य मध्यमारूढमावेदयन्मध्याह्नशङ्खध्वनिरुदतिष्ठत् । तमाकर्ण्य च समासन्नस्नानसमयो विसर्जितराजलोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ ।

अथ चलति महीपतौ गमनप्रणामलालसानामहमहमिकया वक्षःस्थलप्रेङ्खोलितहारलतानामुत्तिष्ठतामासीदतिमहान्संभ्रमो महीपतीनाम् ।

अथ विसर्जितराजलोको विश्राम्यतामिति स्वयमेवाभिधाय तां चाण्डालकन्यकां वैशम्पायनः प्रवेश्यतामभ्यन्तरं स्नानपानाशनादिना च सुखिनमेनं कारयेति ताम्बूलकरङ्कवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत् । अपनीताशेषभूषणश्च समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत् । स तस्यां च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामः श्रमवशादुन्मिषन्तीभिः स्वेदजलकणिकासन्ततिभिरलंक्रियमाणमूर्तिर्दण्डिभिरुपदिश्यमानमार्गः स्नानभूमिमगच्छत् ।

अवतीर्णस्य जलद्रोणीं वारविलासिनीकरमृदितसुगन्धामलकोपलिप्तशिरसो राज्ञः समन्ताद्गृहीतजलकलसाः स्नानार्थ-

मभिषेकदेवता इव वारयोषितस्तस्थुः । द्रोणीसलिलादुत्थाय च स्नानपीठममलस्फटिकधवलं वरुण इव राजहंसमारुरोह । ततस्ता वाराङ्गनाः क्रमेण राजानमभिषिषिचुः । अनन्तरमुदपादि च स्नानशङ्खानामापूर्यमाणानां मुखरो ध्वनिः । एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनी धवले परिधाय धौते वाससी दुकूलपटपल्लवेन कृतशिरोवेष्टनः संपादितपितृजलक्रियो मंत्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत् । उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ चन्दनानुलिप्तसर्वाङ्गः समुचितभोजनैः सह भूपतिभिराहारं निर्वर्तयामास ।

परिपीतधूमवर्तिरुपस्पृश्य च गृहीतताम्बूलस्तस्मात्प्रमृष्टमणिकुट्टिमप्रदेशादुत्थाय नातिदूरवर्तिन्या ससंभ्रमप्रधावितया प्रतीहार्या प्रसारितं बाहुमवलम्ब्याभ्यन्तरसंचारसमुचितेन परिजनेनानुगम्यमानो तुहिनगिरिशिलातलसदृशेन शयनेन सनाथीकृतवेदिकं भुक्त्वास्थानमण्डपमयासीत् । तत्र च शयनतलनिषण्णः क्षितितलोपविष्टया शनैः शनैरुत्सङ्गनिहितासिलतया खड्गवाहिन्या नवनलिनदलकोमलेन करसंपुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन्मुहूर्तमिवासांचक्रे । ततो नातिदूरवर्तिनीमंतःपुराद्वैशम्पायनमादायागच्छेति समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश । सा क्षितितलनिहितजानुकरतला यथाज्ञापयति देव इति शिरसि कृत्वाज्ञां यथादिष्टमकरोत् ।

अथ मुहूर्तादेव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनकवेत्रलतावलम्बिना कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम ।

क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत् । देव देव्यो विज्ञापयन्ति देवादेशादेव वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्यानीतः । इत्यभिधाय गते च तस्मिन्राजा वैशम्पायनमपृच्छत्कच्चिदभिमतमास्वादितमभ्यंतरे भवता किंचिदशनजातमिति । स प्रत्युवाच । देव किं वा नास्वादितम् । कषायमधुरः प्रकाममापीतो जंबूफलरसः । खण्डितानि दाडिमीबीजानि । नलिनीदलहरिन्ति द्राक्षाफलस्वादूनि च दलितान्यामलकीफलानि स्वेच्छया । किं वा प्रलंपितेन बहुना । सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायत इति । एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत् । आस्तां तावत्सर्वमेवेदमपनयतु नः कुतूहलमावेदयतु भवानादितः प्रभृति कार्त्स्न्येनात्मनो जन्म । कस्मिन्देशे भवान्कथं जातः । केन वा नाम कृतम् । का माता । कस्ते पिता । कथं वेदानामागमः । कथं शास्त्राणां परिचयः । कुतः कलाः समासादिताः । किं जन्मान्तरानुस्मरणमुत वरप्रदानम् । अथवा विहगवेषधारी कश्चिच्छन्नो निवससि । क्व वा पूर्वमुषितम् । कियद्वा वयः । कथं पञ्जरबंधः । कथं चाण्डालहस्तगमनमिह वा कथमागमनमिति । वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्तमिव ध्यात्वा सादरमब्रवीत् । देव महतीयं कथा । यदि कौतुकमाकर्ण्यताम् ।

अस्ति पूर्वापरजलनिधिवेलावलग्ना मध्यदेशालंकारभूता मेखलेव भुवः क्वचिदवनिपतिद्वारभूमिरिव वेत्रलताशतदुष्प्रवेशा क्रूरसत्त्वापि मुनिजनसेविता विन्ध्याटवी नाम । तस्यां च दण्डकारण्यान्तःपाति सकलभुवनख्यातमुत्पत्तिक्षेत्रमिव भगवतो

धर्मस्य सुरपतिप्रार्थनानिपीतसकलसागरसलिलस्य भगवतो महामुनेरगस्त्यस्य भार्यया लोपामुद्रया स्वयमुपरचितालवालकैः करपुटसलिलसेकसंवर्धितैः सुतनिर्विशेषैरुपशोभितं पादपैस्तत्पुत्रेण च कुशचीरवाससा मौञ्जमेखलाकलितमध्येन हृदयदस्युनाम्ना पवित्रीकृतं कलशयोनिपरिपीतसागरमार्गानुगतयेव बद्धवेणिकया कावेर्या परिगतमाश्रमपदमासीत् । यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो रामो लक्ष्मणोपरचितपर्णशालः सह सीतया पंचवट्यां कंचित्कालं सुखमुवास । जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलिखिता यत्र रामनिवासदर्शनोत्सुका पुनरिव धरणीतलादुल्लसन्ती वनचरैरद्याप्यालोक्यते ।

आसीत्तस्य चैवंविधस्यागस्त्याश्रमस्य नातिदूरेऽगाधमनन्तमप्रतिममपां निधानं पम्पाभिधानं पद्मसरः । तस्यैव पद्मसरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितजीर्णतालतरुषण्डस्य च समीपेऽधिपातिरिव दण्डकारण्यस्य नायक इव सर्ववनस्पतीनां सखेव विन्ध्यस्य शाखाबाहुभिरुपगुह्येव विन्ध्याटवीमवस्थितो महाञ्जीर्णः शाल्मलीवृक्षः ।

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसंधिषु जीर्णवल्कलविवरेषु महावकाशतया विश्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म । ते च तस्मिन्वनस्पतावतिवाह्य रजनीमात्मनो नीडेषु प्रतिदिनमुत्थायोत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयो विचरन्ति स्म शुकशकुनयः । कृताहाराश्च पुनः प्रतिनिवृत्त्यात्मकुलायावस्थितेभ्यः शावकेभ्यो

विविधान्फलरसान्कमलमञ्जरीविकारांश्च चञ्चुपुटेन दत्वा दत्वासाधारणेन गुरुणापत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनयाः क्षपाः क्षपयन्ति स्म।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्तमानस्य कथमपि पितुरहमेवैको विधिवशात्सूनुरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। अभिमतजायाविनाशशोकदुःखितोऽपि खलु तातः सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकमेकाकी मत्संवर्धनपर एवाभूत्। अतिपरिणतवयाश्च स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडनिपतिताभ्यः शालिवल्लरीभ्यस्तण्डुलकणानादायादाय तरुमूलनिपतितानि च शुककुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमाहारमदात्। प्रतिदिवसमात्मना च मदुपयुक्तशेषमकरोदशनम्।

एकदा तु प्रभातसंध्यारागलोहिते गगनतले स्पष्टे च जाते प्रभाते कुलायनिलीननिभृतशावकसनाथेपि निःशब्दतया शून्य इव तस्मिन्वनस्पतौ स्वनीडावस्थित एव ताते मयि च सहसैव तस्मिन्महावने संत्रासितसकलवनचरो मृगयाकोलाहलध्वनिरुदचरत्। आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकतया जर्जरितकर्णविवरो भयविह्वलः समीपवर्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्।

अनन्तरं च सरभसमितो मृगकदम्बकमितो वनगजकुलमालोक्यतां दिगियमाकर्ण्यतामयं शब्दो गृह्यतां धनुरवहितैः स्थीयतां विमुच्यन्तां श्वान इत्यन्योन्यमभिवदतो मृगयासक्तस्य

महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमशृणवम् ।

अचिराच्च प्रशान्ते तस्मिन्मृगयाकलकले स्तिमिततामुपगते कानने मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरलतारकः शैशवात्किमिदमिति समुपजातविस्मयो दिदृक्षुस्तामेव दिशं चक्षुः प्राहिणवम् । अभिमुखमापतितञ्चानेकसहस्रसंख्यमतिभयजनकमुत्पातवेतालव्रातमिव शबरसैन्यमद्राक्षम् । मध्ये च तस्यातिमहतः शबरसैन्यस्य प्रथमे वयसि वर्तमानमतिकर्कशत्वादायसमयमिव निर्मितं कैश्चिच्छबरवृन्दैः परिवृतमनभिभवनीयाकृतिं मातङ्गकनामानं शबरसेनापतिमपश्यम् । अभिधानं तु तस्य पश्चादहमश्रौषम् । आसीच्च मे मनस्यहो मोहप्रायमेतेषां जीवितम् । साधुजनविगर्हितं च चरितम् । इति चिन्तयत्येव मयि शबरसेनापतिरटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोरधश्छायायामवतारितकोदण्डस्त्वरितपरिजनोपनीते पल्लवासने समुपाविशत् । अन्यतमस्तु शबरयुवा ससंभ्रममवतीर्य तस्मात्सरसो वैदूर्यद्रवानुकार्यरविन्दकोषरजःकषायमम्भः कमलिनीपत्रसंपुटेन प्रत्यग्रोद्धृताश्च धौतपङ्कनिर्मला मृणालिकाः समुपाहरत् । आपीतसलिलश्च शबरसेनापतिस्ता मृणालिकाः शशिकला इव सैंहिकेयः क्रमेणादशत् । अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबरसैन्येनानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत् । एकतमस्तु जरच्छबरस्तस्मात्पुलिन्दवृन्दादनासादितहरिणपिशितः पिशिताशन इवातिविकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुमूले

मुहूर्तमिव व्यलम्बत । अन्तरिते च तस्मिन्शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिरबिन्दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्या गणयन्निव शुककुलकुलायस्थानानि श्येन इव विहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वनस्पतिमामूलादपश्यत् । उत्क्रान्तमिव तस्मिन्क्षणे तदालोकनभीतानां शुककुलानामसुभिः । किमिव हि दुष्करमकरुणानां यतः स तमनेकतालतुंगमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेनैव पादपमधिरुह्य ताननुपजातोत्पतनशक्तीन्कांश्चिदल्पदिवसजातानेकैकशः फलानीव तस्य वनस्पतेः शाखासन्धिभ्यः कोटरान्तरेभ्यश्च शुकशावकानग्रहीदपगतासूंश्च कृत्वा क्षितावपातयत् ।

तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपगतमवलोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्ततरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो दिक्षु विक्षिपन्नुच्छुष्कतालुरात्मप्रतीकाराक्षमस्त्रासस्रस्तसंधिशिथिलेन पक्षपुटेनाच्छाद्य मां तत्कालोचितप्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षाकुलः किंकर्तव्यताविमूढः क्रोडभागेन मामवष्टभ्य तस्थौ । असावपि पापः क्रमेण शाखान्तरैः संचरमाणः कोटरद्वारमागत्य मुहुर्मुहुर्दत्तचञ्चुप्रहारमुत्कूजन्तमाकृष्य तातमपगतासुमकरोत् । मां तु स्वल्पशरीरत्वाद्भयसंपिण्डिताङ्गत्वात्सावशेषत्वाच्चायुषः कथमपि तत्पक्षपुटान्तरगतं नालक्षयत् । उपरतं च तातमवनितले शिथिलशिरोधरमधोमुखममुञ्चत् । अहमपि तच्चरणान्तराले प्रवेशितशिरोधरो निभृतमङ्कदेशनिलीनस्तेनैव सहापतम् । आयुषोवशिष्टतया तु पवनवशात्पुञ्जितस्य महतः

शुष्कपर्णराशेरुपरि निपतितमात्मानमपश्यम् । अङ्गानि मे येन नावाशीर्यन्त । यावच्चासौ तस्मात्तरुशिखरान्नावतरति तावदहमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञो जन्मसहभुवा भयेनैव केवलमभिभूयमानः किञ्चिदुपजाताभ्यां पक्षाभ्यामीषत्कृतगमनावष्टम्भो लुठन्नितस्ततः कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानो नातिदूरवर्तिनोऽतिमहतस्तमालविटपिनो मूलदेशमविशम् । अवतीर्य च तेन समयेन क्षितितलविप्रकीर्णान्संहृत्य ताञ्छुकशिशूनेकलतापाशसंयतानाबध्य पर्णपुटेऽतित्वरितगमनः सेनापतिगतेनैव वर्त्मना तामेव दिशमन्वगच्छत् । मां तु लब्धजीविताशं सर्वाङ्गोपतापिनी बलवती पिपासा परवशमकरोत् । अनया च कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकल्प्य किंचिदुन्नमितकन्धरो भयचकितया दृशा दिशोवलोक्य तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात्तमालतरुमूलात्सलिलसमीपमुपसर्तुं प्रयत्नमकरवम् ।

अनुपजातपक्षतया नातिस्थिरचरणसंचारस्य मुहुर्मुहुरधो मुखेनापततो ममाभून्मनसि । अतिकष्टासु दशास्वपि जीवितनिरपेक्षा न भवन्ति खलु जगति प्राणिनां वृत्तयः । नास्ति जीवितादन्यदभिमततरमिह जगति जन्तूनाम् । एवमुपरतेऽपि सुगृहीतनाम्नि ताते यदहमविकलेन्द्रियः पुनरेव प्राणिमि । धिङ्मामकरुणमतिनिष्ठुरं विसोढपितृमरणशोकदारुणं येन मया जीव्यते । उपकृतमपि नापेक्षते । खलं हि खलु मे हृदयम् । अहं हि लोकान्तरमुपगतायामम्बायां नियम्य शोकावेगमाप्रसवदिवसात्परि-

णतवयसापि सता तातेन तैस्तैरुपायैः संवर्धनक्लेशमतिमहान्तमपि स्नेहवशादगणयता यत्तातेन परिपालितस्तत्सर्वमेकपदे विस्मृतम् । अतिकृपणाः खल्वमी प्राणा यदुपकारिणमपि तातमद्यातिगच्छन्तं नानुगच्छन्ति । सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा यदीदृगवस्थमपि मामायासयति जलाभिलाषः । मन्ये चागणितपितृमरणशोकस्य निर्घृणतयैव केवलमियं मम सलिलपानबुद्धिः । अद्यापि दूरत एव सरस्तीरम् । तथा हि जलदेवतानूपुररवानुकारि दूरेऽद्यापि कलहंसविरुतम् । अस्फुटानि श्रूयन्ते सारसरसितानि । अयं च विप्रकर्षादाशामुखविसर्पणविरलः संचरति नलिनीषण्डपरिमलः । सीदति मे हृदयमन्धकारतामुपयाति चक्षुः । अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेत् ।

इत्येवं चिन्तयत्येव मयि तस्मात्सरसो नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपा मुनिः प्रतिवसति स्म । तत्तनयश्च हारीतनामा मुनिकुमारकः सनत्कुमार इव सर्वविद्यावदातचेताः समानवयोभिरपरैस्तपोधनकुमारैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान्विभावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्तिरुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन तपोवनमृगेणानुगम्यमानो राहुरिवासकृदास्वादितसोमः सन्निहितनेत्रद्वयोऽपि परित्यक्तवामलोचनस्तदेव कमलसरः सिष्णासुरुपागमत् । प्रायेणाकारणमित्राणि सतां खलु भवन्ति सदा चेतांसि । यतः स मां तदवस्थमालोक्य समुपजातदयः समीपतरवर्तिनमृषिकुमारकमन्यतममब्रवीत् । अयं कथमपि शुकशिशुरसंजातपक्षपुट एव तरुशिखरादस्मात्परिच्युतः । श्येनमुखपरिभ्रष्टेन वानेन प्रायो भवितव्यम् । तथा हि ।

अस्याल्पशेषं जीवितम् । अयमामीलितलोचनो मुहुर्मुहुश्चञ्चुपुटं विवृणोति । न शक्नोति शिरोधरां धारयितुम् । तदेहि यावदेवायमसुभिर्न विमुच्यते तावदेव गृहाणैनमवतारय सलिलसमीपम् । इत्यभिधाय तेन मां सरस्तीरमनाययत् । उपसृत्य च जलसमीपमेकदेशनिहितदण्डकमण्डलुरादाय स्वयं मां मुक्तप्रयत्नमुत्तानितमुखमंगुल्या कतिचित्सलिलबिन्दूनपाययत् । अम्भःक्षोदकृतसेकं च समुपजातप्रज्ञमुपतटप्ररूढस्य नलिनीपलाशस्य जलशिशिरायां छायायां निधाय यथासमुचितमकरोत्स्नानविधिम् । अभिषेकावसानेऽनेकप्राणायामपूतो जपन्नघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दैर्नलिनीपत्रपुटेन भगवते सवित्रे दत्वार्घमुदतिष्ठत् । आगृहीतधवलवल्कलश्च सज्योत्स्न इव संध्यातपः करतलनिर्धूतविशदजटः कमण्डलुमापूर्य कमलकिञ्जल्कसुरभिणा शुचिना सरोवारिणा प्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकुमारकदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैः शनैरगच्छत् ।

अनतिदूरमिव गत्वा सदा संनिहितकुसुमपटलैः काननैरुपगूढं पठ्यमानविविधपुस्तकं विचार्यमाणसकलशास्त्रार्थं खाण्डवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यं सतताविर्भूतहव्यधूमगन्धं मातङ्गकुलाध्यासितमपि पवित्रमतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम् । यत्र च मलिनता हविर्धूमेषु न चरितेषु मुनिबालनाशः क्रतुदीक्षया न मृत्युना । यत्र च भुजंगानां भोगः कपीनां श्रीफलाभिलाषो मूलानामधोगतिः ।

तस्य चैवंविधस्य मध्यभागमलंकुर्वाणस्यालक्तकालोहितलोलपल्लवस्य रक्ताशोकतरोरधश्छायायामुपविष्टमतिदूरप्रवृद्धस्य तप-

स्तरोः कुसुममञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभमानमौर्वानलमिव सततपयोभक्षं पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्।

आलोक्य चाहमचिन्तयम् । अहो प्रभावस्तपसामियमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः प्रतिहन्ति तेजांसि । सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य । नित्यमसहिष्णु तपस्विनां प्रतनुतपसामपि तेजः प्रकृत्या दुःसहं भवति । किमुत दर्शनानि । धन्यमिदमाश्रमपदमयमधिपतिर्यत्र । एष प्रवाहः करुणारसस्य । संतरणसेतुः संसारसिंधोराधारः क्षमाम्भसां परशुस्तृष्णालतागहनस्य सागरः संतोषामृतस्य । उपदेष्टा सिद्धिमार्गस्य । अनवकाशो विषयाणाम् । अनभिमुखः सुखानाम् । अस्य भगवतः प्रभावादेवोपशान्तवैरमपगतमत्सरं तपोवनम् । अहो प्रभावो महात्मनाम्। अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तान्तरात्मानस्तिर्यञ्चोपि तपोवनवसतिसुखमनुभवन्ति । इत्येवं चिन्तयन्तमेव मां तस्यैव रक्ताशोकतरोश्छायायामेकदेशे स्थापयित्वा हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्तिनि कुशासने समुपाविशत् । आलोक्य तु मां ते मुनयः सर्व एव कुतोऽयमासादितः शुकशिशुरिति तमासीनमपृच्छन् । असौ तु तानब्रवीत् । अयं मया स्नातुमितोगतेन कमलिनीसरस्तीरतरुनीडपतितो जातदयेनानीतः । अनाथपरिपालनं हि धर्मोस्त्यस्मद्विधानाम् । उद्भिन्नपक्षस्तु यास्यति यत्रास्मै रोचिष्यत इहैव वा समुपजातपरिचयः स्थास्यति । इत्येवमादिकमस्मत्संबद्धालापमाकर्ण्य किंचिदुपजातकुतूहलो भगवाञ्जाबालि-

रतिप्रशान्तया दृष्टयाभिजातप्रत्यभिज्ञ इव मां पुनः पुनर्विलोक्य स्वस्यैवाविनयस्य फलमनेनानुभूयत इत्यवोचत् । स हि भगवान्कालत्रयदर्शी सर्वमेव करतलगतमिव जगदालोकयति वेत्ति च जन्मान्तराण्यतीतानि । ततः सर्वैव तापसपरिषच्छ्रुत्वा विदिततत्प्रभावा कीदृशोऽनेनाविनयः कृतः किमर्थं वा कृतः क्व वा कृतो जन्मान्तरे वा कोयमासीदिति कुतूहलिन्यभवत् । असकृदुपयाचितवती च तं भगवन्तम् । आवेदय प्रसीद भगवन् कीदृशस्याविनयस्य फलमनेनानुभूयते । कश्चायमासीज्जन्मान्तरे विहगजातौ वा कथमस्य संभवः किमभिधानो वायमपनयतु नः कुतूहलमाश्चर्याणां हि सर्वेषां भगवान् प्रभव इति ।

एवमुपयाचितस्तपोधनपरिषदा स महामुनिरवददतिमहदिदमाश्चर्यमाख्यातव्यमल्पशेषमहः प्रत्यासीदति च नः स्नानसमयो भवतामप्यतिक्रामति देवार्चनविधिवेला तदुत्तिष्ठन्तु भवन्तः सर्व एव तावदाचरन्तु यथोचितं दिवसव्यापारमपराह्णसमये भवतां पुनः कृतफलमूलाशनानां विश्रब्धोपविष्टानामादितः प्रभृति सर्वमावेदयिष्यामो योयं यच्च कृतमनेनापरंस्मिञ्जन्मनीह लोके च यथास्य संभूतिः । अयं च तावदपगतश्रमः क्रियतामाहारेण । नियतमयमपि स्वजन्मान्तरवृत्तं स्वप्नोपलब्धमिव मयि कथयति सर्वमशेषतः स्मरिष्यतीत्यभिदधदेवोत्थाय सह तैर्मुनिभिः स्नानादिकं दिवसव्यापारमकरोत् । अनेन समयेन परिणतो दिवसः । अस्तमुपगते च भगवति सहस्रदीधितौ भगवती संध्या समदृश्यत । क्षयमुपगतायां च संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमिरोद्गममभिनवमवहत् । शनैःशनैश्च दूरोदिते भगवति हिमस्रुति प्रवहत्सु निशा-

मुखसमीरेष्वर्धयाममात्रावखण्डितायां विभावर्यां हारीतः कृताहारं मामादाय सर्वैस्तैः सह मुनिभिरुपसृत्य चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासने सुखोपविष्टमनतिदूरवर्तिना जालपादनाम्ना शिष्येण दर्भपवित्रपाणिना मन्दमुपवीज्यमानं पितरमुवाच। तात सकलेयमाश्चर्यश्रवणकुतूहलाकुलितहृदया समुपस्थिता तापसपरिषदाबद्धमण्डला प्रतीक्षते । व्यपनीतश्रमश्च कृतोऽयं पतत्रिपोतस्तदावेद्यतां किमनेन कृतमन्यस्मिञ्जन्मनि कोवायमभूद्भविष्यति वेति । एवमुक्तस्तु स महामुनिरग्रतः स्थितं मामवलोक्य तांश्च सर्वानेकाग्राञ्छ्रवणतत्परान्मुनीन्बुध्वा शनैरब्रवीच्छ्रूयतां यदि कुतूहलम् ।

अस्ति सकलत्रिभुवनललामभूता विजितामरलोकद्युतिरवन्तीषूज्जयिनी नाम नगरी । यस्यां भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधानः स्वयं प्रतिवसति । तस्यां चैवंविधायां नगर्यां नृगनलनहुषययातिधुन्धुमारभरतभगीरथदशरथजनमेजयार्जुनप्रतिमोऽवतार इव धर्मस्य प्रतिनिधिरिव पुरुषोत्तमस्य परिहृतप्रजापीडो राजा तारापीडोऽभवत् । स राजा बाल एव सुरकुञ्जरकरपीवरेण राजलक्ष्मीलीलोपधानेन सकलजगदभयप्रदानशौण्डेन रणयज्ञदीक्षायूपेन स्फुरदसिलतामरीचिजालजटिलेन निखिलारातिकुलप्रलयधूमकेतुना बाहुदण्डेन विजित्य सकलद्वीपवलयां वसुंधरां शुकनासनाम्नि मन्त्रिणि सुहृदीव राज्यभारमारोप्य सुस्थिताः प्रजाः कृत्वा कर्तव्यशेषमपरमपश्यन्प्रशमिताशेषविपक्षतया विगलिताशङ्कः शिथिलितपृथ्वीव्यापारः प्रायशो यौवनसुखमनुबभूव । किं बहुना । यद्यदतिरमणीयमभिमतमविरुद्धमायत्यां तदात्वे च तत्तदनाक्षिप्तचेताः परि-

समाप्तत्वादन्येषां पृथ्वीव्यापाराणां सिषेवे न तु व्यसनितया। प्रजानुरागहेतोश्चान्तरा दर्शनं ददौ सिंहासनं च निमित्तेष्वारुरोह। शुकनासोऽपि महान्तं तं राज्यभारमनायासेनैव प्रज्ञाबलेन बभार। यथैव राजा सर्वकार्याण्यकार्षीत्तद्वदसावपि द्विगुणीकृतप्रजानुरागश्चकार। तमपि चावलितचूडामणिमरीचिमञ्जरीजालिभिर्मौलिभिरावर्जितकुसुमशेखरच्युतमधुसीकरसिक्तसभं दूरावनतिप्रेङ्खितमणिकुण्डलकोटिसंघट्टिताङ्गदं राजकमाननाम।

एवं तस्य राज्ञो मन्त्रिनिवेशितराज्यभारस्य यौवनसुखमनुभवतः कालो जगाम। भूयसा च कालेनान्येषामपि जीवलोकसुखानां प्रायः सर्वेषामन्तं ययौ। एकं तु तनयमुखदर्शनसुखं न लेभे। यथा यथा च यौवनमतिचक्राम तथा विफलमनोरथस्यानपत्यताजन्मा महानवर्धतास्य संतापो विषयोपभोगसुखेच्छाभिश्च मनो विजहे। नरपतिसहस्रपरिवृतमप्यसहायमिव चक्षुष्मन्तमप्यन्धमिव भुवनावलम्बनमपि निरालम्बनमिवात्मानमनपत्यममन्यत। अथ तस्याभूत्त्रिभुवनविस्मयजननी जननीव वनिताविभ्रमाणां सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम। एकदा च स तदावासमुपगतस्तां चिन्तास्तिमितदीनदृष्टिना शोकमूकेन परिजनेन परिवृतामारादवस्थितैश्च ध्यानानिमिषलोचनैः कञ्चुकिभिरुपास्यमानामनतिदूरवर्तिनीभिश्चान्तःपुरवृद्धाभिराश्वास्यमानामविरलाश्रुबिन्दुपातार्द्रीकृतदुकूलामनलंकृतां वामकरतलनिहितमुखकमलामसंयतालकां निबिडपर्यङ्किकोपविष्टां रुदतीं ददर्श। कृतप्रत्यभ्युत्थानां च तां तस्यामेव पर्यङ्किकायामुपवेश्य स्वयं चोपविश्याविज्ञातबाष्पवेगकारणो भीतभीत इव करतलेन विगतबाष्पाम्भःकणौ कुर्व-

न्कपोलौ भूमिपालस्तामवादीत् । देवि किमर्थमन्तर्गतगुरुशोकभारमन्थरमशब्दं रुद्यते । प्रसीद निवेदय देवि दुःखनिमित्तम् । एते हि पल्लवमिव सरागं मम हृदयं कम्पयन्ति तरलीकृतस्तनांशुकास्तवायता निश्वासमारुताः । कच्चिन्मयापराद्धमन्येन वा केनचिदस्मदुपजीविना परिजनेन । अतिनिपुणमपि चिन्तयन्नपश्यामि स्खलितमल्पमप्यात्मनस्त्वद्विषये । त्वदायत्तं हि मे जीवितं राज्यं च । कथ्यतां सुंदरि शुचःकारणमिति । एवमभिधीयमानापि यदा न किंचित्प्रतिवचनं प्रतिपेदे विलासवती तदा विवृद्धबाष्पहेतुमस्याः परिजनमपृच्छत् ।

अथ तस्यास्ताम्बूलकरङ्कवाहिनी सततप्रत्यासन्ना मकरिका नाम राजानमूचे । देव कुतो देवादल्पमपि परिस्खलितम् । अभिमुखे च देवे का शक्तिः परिजनस्यान्यस्य वा कस्यचिदपराद्धुम् । किंतु महाग्रहग्रस्तेव विफलनरेन्द्रसमागमास्मीत्ययमस्या देव्याः संतापः । सुमहांश्च कालः संतप्यमानायाः । प्रथममपि स्वामिनी शयनस्नानभोजनभूषणपरिग्रहादिषु समुचितेषु दिवसव्यापारेषु कथं कथमपि परिजनप्रयत्नात्प्रवर्तमाना सशोकेवासीत् । देवहृदयपीडापरिजिहीर्षया च न दर्शितवती विकारम् । अद्य तु चतुर्दशीति भगवन्तं महाकालमर्चितुमितो गतया तत्र महाभारते वाच्यमाने श्रुतमपुत्राणां किल गतिर्नास्ति न वा सन्ति लोकाः शुभाः । पुन्नाम्नो नरकात्त्रायत इति पुत्र इति । एतच्छ्रुत्वा भवनमागत्य परिजनेन सशिरःप्रणाममभ्यर्थ्यमानापि नाहारमभिनन्दति । न भूषणपरिग्रहमाचरति । नोत्तरं प्रतिपद्यते । केवलमविरलबाष्पबिन्दुदुर्दिनान्धकारितमुखी रोदिति । एतदाकर्ण्य देवः प्रमाणम् । इत्यभिधाय

विरराम । विरतवचनायां तस्यां भूमिपालस्तूष्णीं मुहूर्तमिव स्थित्वा दीर्घमुष्णं च निश्वस्य निजगाद । देवि किमत्र क्रियतां दैवायत्ते वस्तुनि । अलमतिरुदितेन । न वयमनुग्राह्याः प्रायो देवतानाम् । आत्मजपरिष्वङ्गामृतास्वादसुखस्य नूनमभाजनमस्माकं हृदयम् । अन्यस्मिञ्जन्मनि न कृतमवदातं कर्म । जन्मान्तरविहितं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि । न हि शक्यं दैवमन्यथा कर्तुमभियुक्तेनापि । यावत्तु मानुष्यके शक्यमुपपादयितुं तावत्सर्वमुपपाद्यताम् । अधिकां कुरु देवि गुरुषु भक्तिम् । द्विगुणामुपपादय देवतासु पूजाम् । ऋषिजनपरिचर्यासु दर्शितादरा भव । परं हि दैवतमृषयो यत्नेनाराधिता यथासमीहितफलानामतिदुर्लभानामपि वराणां दातारो भवन्ति । श्रूयते च पुरा बहवो राजानस्तपोधनानाराध्य पुत्रदर्शनामृतस्वादसुखभाजो बभूवुः । अहमपि खलु देवि कदा समुपारूढगर्भभरालसामापाण्डुरमुखीमासन्नचन्द्रोदयामिव पौर्णमासीनिशां देवीं द्रक्ष्यामि । कदा मे तनयजन्ममहोत्सवानन्दनिर्भरो हरिष्यति पूर्णपात्रं परिजनः । कदा हारिद्रवसनधारिणी सुतसनाथोत्संगा द्यौरिवोदितरविमण्डला सबालातपा मामानन्दयिष्यति देवी । कदा सर्वौषधिपिञ्जरजटिलकेशो निहितरक्षाघृतमधुबिन्दुतालुर्विन्यस्तगौरसर्षपोन्मिश्रभूतिलेखो गोरोचनाचित्रितकण्ठसूत्रग्रन्थिरुत्तानशयो दशनशून्यस्मिताननः पुत्रको जनयिष्यति मे हृदयाल्हादम् । कदा गोरोचनाकपिलद्युतिरन्तःपुरिकाकरतलपरंपरासंचार्यमाणमूर्तिरशेषजनाभिनन्दितो मङ्गलप्रदीप इव मे शोकान्धकारमुन्मूलयिष्यति चक्षुषोः । कदा च क्षितितलरेणुधूसरो मण्डयिष्यति मम हृदयेन दृष्टया च सह

परिभ्रमन्भवनाङ्गनम् । कदा केसरिकिशोरक इव संजातजानुचङ्क्रमणारम्भः संचरिष्यतीतस्ततः स्फटिकमणिमयभित्त्यन्तरितान्भवनमृगशावकांजिघृक्षुः । कदान्तःपुरिकानूपुरनिनादसंगतान्गृहकलहंसकाननुसरन् कक्षान्तरप्रधावितः कनकमेखलाघण्टिकारवानुसारिणीमायासयिष्यति धात्रीम् । कदा कृष्णागुरुपङ्कलिखितमदलेखालंकृतगण्डस्थलः कोमलमुखडिण्डिमध्वनिजातप्रीतिरूर्ध्वकरविप्रकीर्णचन्दनचूर्णधूलिधूसरः कुञ्चिताङ्गुलिशिखराङ्कुशाकर्षणविधूतशिराः करिष्यति मदमत्तगजलीलाम् । कदा मातुश्चरणरागोपयुक्तशेषेण पिण्डालक्तकरसेन कञ्चुकिनां विडम्बयिष्यति मुखानि । कदा कुतूहललोललोचनो मणिकुट्टिमेष्वधोदत्तदृष्टिरनुसरिष्यति स्खलद्गतिरात्मनः प्रतिबिम्बानि । कदा नरेन्द्रसहस्रप्रसारितभुजयुगलाभिनन्द्यमानागमनो भूषणमणिमयूखलेखाकुलीक्रियमाणलोलदृष्टिरास्थानस्थितस्य मम पुरः पर्यटिष्यति सभान्तरेषु । इत्येतानि चान्यानि मनोरथशतानि चिन्तयतोऽन्तः संतप्यमानस्य यान्ति रजन्यः । मामपि दहत्येवायमहर्निशमनल इवानपत्यतासमुद्भवः शोकः । शून्यमिव मे प्रतिभाति जगत् । अफलमिवाखिलं पश्यामि जीवितं राज्यं च । अप्रतिविधेये तु विधातरि किं करोमि । तन्मुच्यतां देवि शोकानुबन्धः । आधीयतां धैर्ये धर्मे च धीः । धर्मपरायणानां हि सदा समीपसंचारिण्यः कल्याणसंपदो भवन्ति । एवमभिधाय सलिलमादाय स्वयं करतलेनाभिनवपल्लवेनेव विकचकमलतुल्यमाननमस्याः साश्रुलेखं ममार्ज । पुनःपुनश्च प्रियशतमधुराभिः शोकापनोदनिपुणाभिर्धर्मोपदेशगर्भाभिर्वाग्भिराश्वास्य सुचिरं स्थित्वा नरेन्द्रो निर्जगाम ।

निर्गते च तस्मिन्मन्दीभूतशोकावेगा विलासवती यथाक्रियमाणाभरणपरिग्रहादिकं समुचितं वासरव्यापारमकरोत् । ततः प्रभृति सुतरां देवताराधनेषु ब्राह्मणपूजासु गुरुजनपरिचर्यासु चादरवती बभूव । यद्यच्च किंचित्कुतश्चिच्छुश्राव व्रतं तत्तदर्भकतृष्णया सर्वं चकार । न महान्तमपि क्लेशमजीगणत् । चण्डिकागृहेषु धवलाम्बरा शुचिमूर्तिरुपोषिता हरितकुशोपच्छन्नेषु भूतलशयनेषु सुष्वाप ।

एवं गच्छति काले कदाचिद्राजा क्षीणभूयिष्ठायां रजन्यां स्वप्ने सौधशिखरस्थिताया विलासवत्या आनने सकलकलापरिपूर्णमण्डलं शशिनं प्रविशन्तमद्राक्षीत् । प्रबुद्धश्चोत्थाय तस्मिन्नेव क्षणे सबहुमानं शुकनासमाहूय तं स्वप्नमकथयत् । समुपजातहर्षः स तं प्रत्युवाच । देव संपन्नाः सुचिरादस्माकं मनोरथाः । कतिपयैरेवाहोभिरसंशयमनुभविष्यति स्वामी सुतमुखकमलावलोकनसुखम् । अद्य खलु मयापि स्वप्ने निशि धौतधवलवाससा प्रशान्तमूर्तिना दिव्याकृतिना द्विजेन विकचचन्द्रकलावदातदलशतं पुण्डरीकमुत्सङ्गे देव्या मनोरमाया निहितं दृष्टम् । आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रजातानि शुभानि निमित्तानि । किं वान्यत्प्रियतरं परमानन्दकारणमतो विद्यते । अवितथफला हि प्रायो निशावसानसमये दृष्टा भवन्ति स्वप्नाः । सर्वथा न चिरेणैव भुवनानन्दहेतुमात्मजं जनयिष्यति देवी । येनेयं क्षितिभारधारणोचिता भविष्यति कुलसंततिः स्वामिनः । एवमभिदधानमेव तं करेण गृहीत्वा नरेन्द्रः प्रविश्याभ्यन्तरमुभाभ्यामपि स्वप्नाभ्यां विलासवतीमानन्दयांचकार । कतिपयदिवसापगमे च देवताप्रसादात्सरसीमिव प्रतिमाशशी

गर्भो विवेश विलासवतीम् । दर्पणश्रीरिवगर्भच्छलेन संक्रान्तमवनिपालप्रतिबिम्बमुवाह । शनैःशनैश्च प्रतिदिवसमुपचीयमानगर्भा मन्दं मन्दं संचचार । मुहुर्मुहुरनुबद्धजृम्भिकाजिह्मितलोचनं सालसं निशश्वास । तथावस्थां तामनभिनन्दितपानभोजनां केतकीमिव गर्भपाण्डुरामालोक्येङ्गितकुशलः परिजनो विज्ञातवान् ।

अथ तस्याः सर्वपरिजनप्रधानभूता सदा राजकुलसंवासचतुरा सर्वदा च राजसंनिकर्षप्रगल्भा सर्वमङ्गलकुशला कुलवर्धना नाम महत्तरिका प्रशस्ते दिवसे प्रदोषवेलायामभ्यन्तरास्थानमण्डपगतं प्रधाननरेन्द्रैः परिमितैः परिवृतमनतिदूरावस्थितपरिजनं समुपारूढविश्रम्भनिर्भरास्तास्ताः कथाः शुकनासेन सह कुर्वाणं भूमिपालमुपसृत्य रहः कर्णमूले विदितविलासवतीगर्भवृत्तान्तमकार्षीत् । तेन तु तस्या वचनेनाश्रुतपूर्वेणासंभाव्येनामृतरसेनेव सिक्तसर्वाङ्गस्य सद्यः प्रकटरोमाङ्कुरनिकरकण्टकिततनोरानन्दरसेन विह्वलीक्रियमाणस्य राज्ञः शुकनासमुखे लोलतारकं तत्क्षणं पपात चक्षुः । अनालोकितपूर्वं तु हर्षप्रकर्षमभिसंवीक्ष्य भूपतेः कुलवर्धनां च स्मितविकसितमुखीमागतां दृष्ट्वा तस्य चार्थस्य सततं मनसि वर्तमानत्वादविदितवृत्तान्तोपि तत्कालोचितमपरमतिमहतो हर्षस्य कारणमपश्यञ्छुकनासः स्वयमुत्प्रेक्ष्य समुत्सर्पितासनः समीपतरमुपसृत्य नातिप्रकाशमाबभाषे । देव किमस्ति किंचिदस्मिन्स्वप्नदर्शने सत्यम् । उत्फुल्ललोचना हि कुलवर्धना दृश्यते । देवस्यापीदमानन्दजलपरिप्लुतं तरलतारकमावेदयति महत्प्रहर्षकारणमीक्षणयुगलम् । उपारूढमहोत्सवश्रवणकुतूहलमुत्सुकं क्राम्यति मे मनः । तदावेद-

यतु देवः किमिदम् । इत्युक्तवति तस्मिन्राजा विहस्याब्रवीत् । यदि सत्यमनया यथा कथितं तथा सर्वमवितथं स्वप्नदर्शनम् । अहं तु न श्रद्दधे । कुतोऽस्माकमियती भाग्यसंपत् । अभाजनं हि वयमीदृशानां प्रियवचःश्रवणानाम् । अवितथवादिनीमप्यहं कुलवर्धनामेवंविधानां कल्याणानामसंभावितमात्मानं मन्यमानो विपरीतामिवाद्य पश्यामि । तदुत्तिष्ठ स्वयमेव गत्वा किमत्र सत्यमिति देवीं पृष्ट्वा ज्ञास्यामि । इत्यभिधाय विसर्ज्य सकलनरेन्द्रलोकमुन्मुच्य स्वाङ्गेभ्यो भूषणानि कुलवर्धनायै दत्वा तस्याश्च शिरःप्रणामेनाभ्यर्चितः सह शुकनासेनोत्थाय हर्षविशेषनिर्भरेण त्वर्यमाणो मनसा विरलविरलेन परिजनेनानुगम्यमानोऽन्तःपुरमयासीत् ।

तत्र बहुकृतरक्षासंविधाने मणिप्रदीपप्रहततिमिरे वासभवन आबद्धविविधौषधिमूलमन्त्रपवित्रं गर्भोचितं शयनतलमधिशयानामाचारकुशलेनान्तःपुरजरतीजनेन सलिलाञ्जलिभिः क्रियमाणावतरणमङ्गलां प्रमुदितेन परिजनेनोपास्यमानां गोरोचनाचित्रितदशमनुपहतमतिधवलं दुकूलयुगलं वसानां विलासवतीं ददर्श । ससंभ्रममुत्तिष्ठन्तीं च तामलमलमत्यादरेण देवि नोत्थातव्यमित्यभिधाय सह तया तस्मिन्नेव शयनीये पार्थिवः समुपाविशत् । आसन्ने च शयनान्तरे शुकनासोऽपि न्यषीदत् । अथ तामुपारूढगर्भामालोक्य हर्षभरमन्थरेण मनसा प्रस्तुतपरिहासो राजा देवि शुकनासः पृच्छति यदाह कुलवर्धना किमपि तत्किं तथैवेत्युवाच । अथाव्यक्तस्मितच्छुरितकपोलाधरलोचना लज्जया दशनांशुजालकव्याजेनांशुकेनेव मुखमाछादयन्ती विलासवती तत्क्षणमधोमुखी तस्थौ । पुनःपुनश्चानुरुध्यमाना किं नाम मामतिमात्रं

त्रपापरवशां करोषि नाहं किंचिदपि वेद्मीत्यभिदधाना तिर्यग्वलिततारकेण चक्षुषावनतमुखी राजानं साभ्यसूयमिवापश्यत् । अपरिस्फुटहासज्योत्स्नाविशदेन मुखशशिना भूभुजां पतिरेनां भूयो बभाषे । सुतनु यदि मदीयेन वचसा तव त्रपा वितन्यते तदयमहं स्थितो निभृतम् । अस्य तु किं प्रतिविधास्यसि पाण्डुरतामापद्यमानस्य वर्णस्य । अस्य च प्रतिदिनं काञ्चीकलापेन दूयमानस्य मध्यभागस्येति । एवं ब्रुवाणं नरपतिमन्तर्मुखविनिगूढहासः शुकनासो देव किमायासयसि देवीमियमनया कथयापि लज्जते त्यज कुलवर्धनाकथितवार्तासंबद्धमालापमित्यब्रवीत् । एवंविधाभिश्च नर्मप्रायाभिः कथाभिः सुचिरं स्थित्वा शुकनासः स्वभवनमयासीत् । नरेन्द्रोऽपि तस्मिन्नेव वासगृहे तया सह तां निशामत्यवाहयत् ।

ततः क्रमेण यथासमीहितगर्भदोहदसंपादनप्रमुदिता प्रसवसमये पुण्येऽहनि प्रशस्तायां वेलायां सकललोकहृदयानन्दकारिणं विलासवती सुतमसूत । तस्मिञ्जाते सरभसमितस्ततः प्रधावितस्य परिजनस्य संक्षोभितनगरो राजकुले दिष्टिवृद्धिसंभ्रमोऽतिमहानभूत् । अनन्तरं चानेकजनसहस्रकलकलबहुलेन त्रिभुवनमापूरयतोत्सवकोलाहलेन ससामन्ताः सान्तःपुराः सप्रकृतयः सराजलोकाः सवेश्यायुवतयः सबालवृद्धा ननृतुरागोपालमुन्मत्ता इव हर्षनिर्भराः प्रजाः । प्रतिक्षणमवर्धत चन्द्रोदयेनेव जलनिधिः कलकलमुखरो राजसूनोर्जन्ममहोत्सवः । पार्थिवस्तु तनयाननदर्शनोत्सवहृतहृदयोऽपि दिवसवशेन मौहूर्तिकगणोपदिष्टे प्रशस्ते मुहूर्ते निवारितनिखिलपरिजनः शुकनासद्वितीयः सूतिकागृहमपश्यत् । अम्भः पावकं च स्पृष्ट्वा विवेश । प्रविश्य च प्रसव-

परिक्षामपाण्डुमूर्तेरुत्संगगतं विलासवत्याः स्वप्रभासमुदयोपहत-गर्भगृहप्रदीपप्रभं महापुरुषलक्षणैरुपेतमाल्हादहेतुमात्मजं ददर्श । विगतनिमेषनिश्चलपक्ष्मणा मुहुर्मुहुर्दूरविस्फारितेन स्निग्धेन चक्षुषा पिबन्निव स्पृशन्निव मनोरथसहस्रप्राप्तदर्शनं सस्पृहमीक्षमाणस्तनया-ननं मुमुदे कृतकृत्यं चात्मानं मेने । समृद्धमनोरथः शुकनास-स्तु शनैःशनैरङ्गप्रत्यङ्गान्यस्य निरूपयन्प्रीतिविस्फारितलोचनो भूमिपालमवादीत् । देव पश्य पश्यास्य कुमारस्य गर्भसंपीडन-वशादपरिस्फुटावयवशोभस्यापि माहात्म्यमाविर्भावयन्ति चक्र-वर्तिचिह्नानि । तथा हि । अस्य ललाटपट्टे नवनलिननालभङ्गतंतु-तन्वीयमूर्णा परिस्फुरति । एतद्विकचपुण्डरीकधवलं कर्णान्तायतं मुहुर्मुहुरुन्मिषितैर्धवलयतीव वासभवनमरालपक्ष्म लोचनयुग-लम् । विजृम्भमाणकमलकोषपरिमलमनोहरमियमस्य सहज-माननामोदमाजिघ्रतीव दूरायता कनकलेखेव नासिका । रक्तोत्पलनिकरमुद्वहतीव चास्याधरम् । रक्तोत्पलकलिकालोहित-तलौ भगवतो विष्टरश्रवस इव शङ्खचक्रचिह्नौ प्रशस्तलेखा-लाञ्छितौ करौ । अभिनवकल्पतरुपल्लवकोमलं लेखामयैर्ध्वजरथ-तुरगातपत्रकमलैरलंकृतमनेकनरेन्द्रसहस्रचूडामणिचक्रचुम्बनोचितं चरणयुगलम् । एष च दुन्दुभेरिवातिगम्भीरः स्वरयोगोऽस्य रुदतः श्रूयते ।

इत्येवं कथयति तस्मिन्ससंभ्रमापसृतेन राजलोकेन द्वारि स्थितेन दत्तमार्गो मङ्गलकनामा प्रहृष्टवदनः पुरुषः पादयोः प्रणम्य राजानं व्यजिज्ञपत् । देव दिष्टया वर्धसे । प्रतिहतास्ते शत्रवश्चिरं जीव । जय च पृथिवीम् । त्वत्प्रसादादत्रभवतः शुकनासस्यापि ज्येष्ठायां ब्राह्मण्यां मनोरमाभिधानायां राम इव

रेणुकायां तनयो जातः। श्रुत्वा देवः प्रमाणमिति। अथ नृपतिरमृतवृष्टिप्रतिममाकर्ण्य तद्वचनं प्रीतिविस्फारिताक्षः प्रत्यवदत्। अहो कल्याणपरंपरा। सत्योऽयं जनप्रवादो यद्विपद्विपदं संपत्संपदमनुबध्नातीति। सर्वथा समानसुखदुःखतां दर्शयता विधिनापि भवतैव वयमनुवर्तिताः। इत्यभिधाय स्वयमेव शुकनासस्योत्तरीयं पूर्णपात्रं जहार। तस्मै च पुरुषायापरिमितं पारितोषिकमादिदेशोत्थाय च तथैव तेन राजपरिजनेनानुगम्यमानः शुकनासभवनं गत्वा द्विगुणतरमुत्सवमकारयत्।

अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्ते गाः सुवर्णं च कोटिशो ब्राह्मणसात्कृत्वा मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलमाविशन्दृष्ट इति स्वप्नानुरूपमेव राजा स्वसूनोश्चन्द्रापीड इति नाम चकार। अपरेद्युः शुकनासोऽपि कृत्वा ब्राह्मणोचिताः सकलाः क्रिया राजानुमतमात्मजस्य विप्रजनोचितं वैशम्पायन इति नाम चक्रे। क्रमेण कृतचूडाकरणादिबालक्रियाकलापस्य शैशवमतिचक्राम चन्द्रापीडस्य।

तारापीडः क्रीडाव्यासङ्गविघातार्थं बहिर्नगरादनुशिप्रमर्धक्रोशमात्रायाममतिमहता तुहिनगिरिशिखरानुकारिणा सुधाधवलेन प्राकारमण्डलेन परिवृतमनुप्राकारमाहितेन महता परिखावलयेन परिवेष्टितमतिदृढकपाटसंपुटमुद्घाटितैकद्वारप्रवेशमेकान्तोपरचिततुरगवाह्यालीविभागमधःकल्पितव्यायामशालममरागाराकारं विद्यामन्दिरमकारयत्। सर्वविद्याचार्याणां च संग्रहे यत्नमतिमहान्तमन्वतिष्ठत्।

तत्रस्थं च तं केसरिकिशोरकमिव पञ्जरगतं कृत्वा प्रतिषि-

द्वनिर्गममाचार्यकुलपुत्रप्रायपरिजनपरिवारमपनीताशेषशिशुजनक्रीडाव्यासङ्गमनन्यमनसमखिलविद्योपादानार्थमाचार्येभ्यश्चन्द्रापीडं शोभने दिवसे वैशम्पायनद्वितीयमर्पयांबभूव । प्रतिदिनं चोत्थायोत्थाय सह विलासवत्या विरलपरिजनस्तत्रैव गत्वैनमालोकयामास राजा ।

चन्द्रापीडोऽप्यनन्यहृदयतया तथा नियन्त्रितो राज्ञाचिरेणैव कालेन यथास्वमात्मकौशलं प्रकटयद्भिः पात्रवशादुपजातोत्साहैराचार्यैरुपदिश्यमानः सर्वविद्या जग्राह । मणिदर्पण इवातिनिर्मले तस्मिन्संचक्राम सकलः कलाकलापः । तथा हि । पदे वाक्ये प्रमाणे धर्मशास्त्रे राजनीतिषु व्यायामविद्यासु चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतिषु सर्वेष्वायुधविशेषेषु रथचर्यासु गजपृष्ठेषु तुरंगमेषु वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतिषु वाद्येषु भरतादिप्रणीतेषु नृत्यशास्त्रेषु नारदीयप्रभृतिषु गान्धर्ववेदविशेषेषु हस्तिशिक्षायां तुरगवयोज्ञाने पुरुषलक्षणेषु चित्रकर्मणि यन्त्रच्छेद्ये पुस्तकव्यापारे लेख्यकर्मणि सर्वासु द्यूतकलासु गन्धशास्त्रेषु शकुनिरुतज्ञाने ग्रहगणिते रत्नपरीक्षासु रतितन्त्रेष्विन्द्रजाले नाटकेष्वाख्यायिकासु काव्येषु महाभारतपुराणेतिहासरामायणेषु सर्वलिपिषु सर्वदेशभाषासु सर्वसंज्ञासु शिल्पेषु छन्दःस्वन्येष्वपि कलाविशेषेषु परं कौशलमवाप ।

सहजा श्रममभ्यस्यतो वृकोदरस्येव शैशव एवाविर्बभूव सर्वलोकविस्मयजननी महाप्राणता । ऋते च महाप्राणतायाः सर्वाभिरन्याभिः कलाभिरनुचकार तं वैशम्पायनः । चन्द्रापीडस्य तु सहपांशुक्रीडनतया सहसंवृद्धतया च सर्वविश्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत् । निमेषमपि तेन

विना स्थातुमेकाकी न शशाक । वैशम्पायनोऽपि न क्षणमपि तं विरहयांचकार । एवं तस्य सर्वविद्यापरिचयमाचरतश्चन्द्रापीडस्य यौवनारम्भः प्रादुर्भवन्रमणीयस्यापि द्विगुणां रमणीयतां पुपोष । लब्धावसरोऽनुसेवक इव निकटीबभूवास्य मन्मथः ।

एवं च क्रमेण समारूढयौवनारम्भं परिसमाप्तसकलकलाविज्ञानमनुमोदितमाचार्यैश्चन्द्रापीडमानेतुं राजा बलाधिकृतं बलाहकनामानमाहूय बहुतुरगबलपदातिपरिवृतमतिप्रशस्तेऽहनि प्राहिणोत् । स गत्वा विद्यागृहं द्वारपैः समावेदितः प्रविश्य क्षितितलविलम्बितचूडामणिना शिरसा प्रणम्य स्वभूमिसमुचिते राजसमीप इव सविनयमासने राजपुत्रानुमतो न्यषीदत् । स्थित्वा च मुहूर्तमात्रं बलाहकश्चन्द्रापीडमुपसृत्य दर्शितविनयो व्यजिज्ञपत्। कुमार महाराजः समाज्ञापयति । पूर्णा मे मनोरथाः। अधीतानि शास्त्राणि । शिक्षिताः सकलाः कलाः । गतोऽसि सर्वायुधविद्यासु परां प्रतिष्ठाम् । अनुमतोऽसि निर्गमाय विद्यागृहात्सर्वाचार्यैः। उपगृहीतशिक्षं पश्यतु त्वां जनः । व्रजन्तु सफलतामतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि । दर्शनं प्रति ते समुत्सुकान्यतीव सर्वाण्यन्तःपुराणि । अयमत्रभवतो दशमो वत्सरो विद्यागृहमधिवसतः । प्रविष्टोऽसि षष्ठमनुभवन्वर्षम्। एवं सम्पिण्डितेनाधुना षोडशेन प्रवर्धसे । तदद्यप्रभृति निर्गत्य दर्शनोत्सुकाभ्यो दत्वा दर्शनं मातृभ्योऽभिवाद्य च गुरूनपगतनियन्त्रणो यथासुखमनुभव राज्यसुखानि नवयौवनललितानि च। संमानय राजलोकम् । पूजय द्विजातीन् । परिपालय प्रजाः । आनन्दय बन्धुवर्गम् । अयं च ते त्रिभुवनैकरत्नमनिलगरुडसमजव इन्द्रायुधनामा तुरंगमः

प्रेषितो महाराजेन द्वारि तिष्ठति । एष खलु देवस्य पारसीकाधिपतिना त्रिभुवनाश्चर्यमिति कृत्वा जलनिधिजलादुत्थितमयोनिजमिदमश्वरत्नमासादितं मया महाराजारोहणयोग्यमिति संदिश्य प्रहितः । दृष्ट्वा च निवेदितं लक्षणविद्भिः । देव यान्युच्चैःश्रवसः श्रूयन्ते लक्षणानि तैरयमुपेतो नैवंविधो भूतो भावी वा तुरंगम इति । तदयमनुगृह्यतामधिरोहणेन । इदं च मूर्धाभिषिक्तपार्थिवकुलप्रसूतानां विनयोपपन्नानां शूराणामभिरूपाणां कलावतां च कुलक्रमागतानां राजपुत्राणां सहस्रं परिचारार्थमनुप्रेषितं तुरंगमाधिरूढं द्वारि प्रणामलालसं प्रतिपालयति । इत्यभिधाय विरतवचसि बलाहके चन्द्रापीडः पितुराज्ञां शिरसि कृत्वा नवजलधरध्वानगम्भीरया गिरा प्रवेश्यतामिन्द्रायुध इति निर्जिगमिषुरादिदेश । अथ वचनानन्तरमेव प्रवेशितमश्वातिशयमिन्द्रायुधमद्राक्षीत् । दृष्ट्वा च तमदृष्टपूर्वमशेषलक्षणोपपन्नमतिधीरप्रकृतेरपि चन्द्रापीडस्य पस्पर्श विस्मयो हृदयम् । आसीच्चास्य मनसि । अतितेजस्वितया महाप्राणतया च सदैवतेवेयमस्याकृतिर्यत्सत्यमारोहणे शङ्कामिव मे जनयति । न हि सामान्यवाजिनामीदृश्यो भवन्त्याकृतयः । दैवतान्यपि हि मुनिशापवशाच्छरीरान्तराण्यध्यासत एव । श्रूयते हि । पुरा महात्मानो मुनिजनशापपरिपीतप्रभावा नानाकारा भूत्वा बभ्रमुरिमं लोकम् । असंशयमनेनापि महात्मना केनापि शापभाजा भवितव्यम् । आवेदयतीव मदन्तःकरणमस्य दिव्यताम् ।

इति विचिन्तयन्नेवारुरुक्षुरासनादुदतिष्ठत् । मनसा च तं तुरंगममुपसृत्य महात्मन्नर्वन्योऽसि सोऽसि नमोऽस्तु ते सर्वथा मर्षणीयोऽयमारोहणातिक्रमोऽस्माकम् । अपरिगतानि दैवतान्यप्य-

नुचितपरिभवभाञ्जि भवन्तीत्यामन्त्रयांबभूव । विदिताभिप्राय इव स तमिन्द्रायुधो मुहुर्मुहुस्ताडयता क्षितितलं दक्षिणखुरेणारोहणायाह्वयन्निवातिमनोहरं हेषारवमकरोत् । अथानेन मधुरहेषितेन दत्तारोहणाभ्यनुज्ञ इवेन्द्रायुधमारुरोह चन्द्रापीडः । समारुह्य तं प्रादेशमात्रमिव त्रैलोक्यमखिलं मन्यमानो निर्गत्यादृष्टपर्यन्तमप्रमेयमश्वसैन्यमपश्यत् । ते राजपुत्राश्चैकैकशः प्रतिनामग्रहणमावेद्यमाना बलाहकेन दूरावनतैः शिरोभिस्तं प्रणेमुः । चन्द्रापीडस्तु तान्सर्वान्मानयित्वा यथोचितमनन्तरं तुरंगमाधिरूढेनानुगम्यमानो वैशम्पायनेन जय जीवेति च मधुरवचसा मङ्गलप्रायमनवरतमुच्चैः पठता बन्दिजनेन स्तूयमानो नगराभिमुखः प्रतस्थे ।

क्रमेण च तं समासादितविग्रहमनङ्गमिवावतीर्णं नगरमार्गमनुप्राप्तमवलोक्य सर्व एव परित्यक्तसर्वव्यापारो रजनीकरोदयपरिबुध्यमानकुमुदवनानुकारी जनः समजनि । अनन्तरं च समाप्तसकलविद्यो विद्यागृहान्निर्गतोऽयमागच्छति चन्द्रापीड इति समाकर्ण्यालोकनकुतूहलिन्यः सर्वस्मिन्नेव नगरे ससंभ्रममुत्सृष्टार्धपरिसमाप्तप्रधानव्यापारा हर्म्यतलानि ललनाः समारुरुहुः । मुहूर्तादिव युवतिजननिरन्तरतया नारीमया इव प्रासादा बभूवुः । कौतुकप्रसारितनिश्चललोचनानां पश्यन्तीनां तासामादर्शमयानीव सलिलमयानीव स्फटिकमयानीव हृदयानि विवेश चन्द्रापीडाकृतिः । आविर्भूतमदनरसानाश्चान्योन्यतः सपरिहासाः सविभ्रमाः सेर्ष्याः सोत्प्रासाः साभ्यसूयाः सविलासाः समन्मथाः सस्पृहाश्च तत्क्षणमतिरमणीयाः प्रसस्रुरालापाः । क्रमेण च राजकुलसमीपमाससाद चन्द्रापीडः । राजद्वारं चासाद्य तुरंगमादवततार ।

अवतीर्य च करतलेन करे वैशम्पायनमवलम्ब्य पुरः सविनयं प्रस्थितेन बलाहकेनोपदिश्यमानमार्गो राजकुलं विवेश। ससंभ्रमोपगतैश्च कृतप्रणामैः प्रतीहारमण्डलैरुपदिश्यमानमार्ग उभयतो वारविलासिनीभिश्चानवरतमुद्धूयमानधवलचामरं हंसधवलशयनतले निषण्णं पितरमपश्यत्। आलोकयेति च प्रतीहारवचनानन्तरमतिदूरावनतेन चलितचूडामणिना शिरसा कृतप्रणाममेह्येहीत्यभिदधानो दूरादेव प्रसारितभुजयुगलः शयनतलादीषदुच्छ्वसितमूर्तिरानन्दजलापूर्यमाणलोचनः समुद्गतपुलककण्टकतया सीव्यन्निवैकीकुर्वन्निव तं पिता विनयावनतं समालिलिङ्ग। आलिङ्गितोन्मुक्तश्च पितुश्चरणपीठसमीपे पिण्डीकृतमुत्तरीयमात्मताम्बूलकरङ्कवाहिन्या सत्वरमासन्नीकृतमपनयेति शनैर्वदन्नग्रचरणेन समुत्सार्य चन्द्रापीडः क्षितितल एव निषसाद। अनन्तरनिहिते चास्यासने राज्ञा सुतनिर्विशेषमुपगूढो वैशम्पायनो न्यषीदत्। मुहूर्तमिव स्थित्वा गच्छ वत्स पुत्रवत्सलां मातरमभिवाद्य दर्शनलालसा यथाक्रमं सर्वा जननीर्दर्शनेनानन्दयेति विसर्जितः पित्रा सविनयमुत्थाय राजपरिजनेनोपदिश्यमानवर्त्मान्तःपुरमाययौ।

तत्र धवलकञ्चुकावच्छन्नशरीरैरनेकशतसंख्यैः समन्तात्परिवृतां शुद्धान्तान्तर्वंशिकैः समुपसृत्य मातरं प्रणनाम। सा तु तं ससंभ्रममुत्थाप्य सत्याज्ञासंपादनदक्षे पार्श्वपरिवर्तिनि परिजने स्वयमेव कृतावतरणमङ्गला प्रस्नुतपयोधरक्षरत्पयोबिन्दुच्छलेन द्रवीभूय स्नेहाकुलेन निर्गच्छतेव हृदयेनान्तः शुभशतान्यभिध्यायन्ती मूर्धन्युपाघ्राय तं सुचिरमाशिश्लेष। अनन्तरं च तथैव कृतयथोचितसमुपचारमाश्लिष्टवैशम्पायना स्वयमुपविश्य विनयादवनितले समुपाविशन्तमाकृष्य बलादनिच्छन्तमपि चन्द्रापीडमुत्सङ्ग-

मारोपितवती । ससंभ्रमपरिजनोपनीतायामासन्द्यामुपविष्टे च वैशम्पायने चन्द्रापीडं पुनः पुनरालिङ्ग्य ललाटदेशे वक्षसि भुजशिखरयोश्च मुहुर्मुहुः करतलेन परामृशन्ती विलासवती तमवादीत्। वत्स कठिनहृदयस्ते पिता येनेयमाकृतिरीदृशी त्रिभुवनलालनीया क्लेशमतिमहान्तमियन्तं कालं लम्भिता । कथमसि सोढवानतिदीर्घामिमां गुरुजनयन्त्रणाम् । अहो बालस्यापि सतः कठोरस्येव ते महद्धैर्यम्। अहो विगतशिशुजनक्रीडाकौतुकलाघवमर्भकस्यापि ते हृदयम् । अहो गुरुजनस्योपरि भक्तिरसाधारणा। सर्वथा यथा पितुः प्रसादात्समस्ताभिरुपेतो विद्याभिरालोकितोस्येवमचिरेणैव कालेनानुरूपाभिर्वधूभिरुपेतमालोकयिष्यामीति । एवमभिधाय लज्जास्मितावनतं कपोले पर्यचुम्बदेनम् । एवं च तत्रापि नातिचिरमेव स्थित्वा क्रमेण सर्वान्तःपुराणि दर्शनेनानन्दयामास। निर्गत्य च राजकुलद्वारावस्थितमिन्द्रायुधमारुह्य तथैव तेन राजपुत्रलोकेनानुगम्यमानः शुकनासं द्रष्टुमयासीत्।

अथ शुकनासगृहद्वारमासाद्य सत्वरप्रधावितैर्द्वारदेशावस्थितैः प्रतीहारपुरुषैरनिवार्यमाणोऽपि राजकुल इव राजपुत्रो बाह्याङ्गन एव तुरंगादवततार । द्वारदेशावस्थापिततुरंगश्च वैशम्पायनमवलम्ब्य पुरः प्रधावितैः समुत्सारितपरिजनैस्तत्प्रतीहारमण्डलैरुपदिश्यमानमार्गस्तथैव च द्वितीयमिव राजकुलं शुकनासभवनं विवेश । प्रविश्य चानेकनरेन्द्रसहस्रमध्योपविष्टमपरमिव पितरमुपदर्शितविनयो दूरावनतेन मौलिना शुकनासं ववन्दे। शुकनासस्तं सह वैशम्पायनेन प्रेम्णा गाढमालिलिङ्ग। आलिङ्गितोन्मुक्तश्च सादरोपनीतमपहाय रत्नासनमवनावेव राजपुत्रः समुपाविशत्। तदनु च वैशम्पायनः। समुपविष्टे च

राजपुत्रे शुकनासवर्जमन्यदखिलमवनिपालचक्रमुज्झितनिजासनमवनितलमभजत । स्थित्वा च तूष्णीं क्षणमिव शुकनासः समुद्गतप्रीतिपुलकैरङ्गैरावेद्यमानहृदयहर्षस्तमब्रवीत् ।

तात चन्द्रापीडाद्य खलु देवस्य तारापीडस्य समाप्तविद्यमुपारूढयौवनमालोक्य भवन्तं सुचिराद्भुवनराज्यफलप्राप्तिरुपजाता । अद्य समृद्धाः सर्वा गुरुजनाशिषः । अद्य फलितमनेकजन्मान्तरोपात्तमवदातं कर्म । अद्य प्रसन्नाः कुलदेवताः । नह्यपुण्यभाजां भवादृशाः सकलत्रिभुवनविस्मयहेतवः पुत्रतां प्रतिपद्यन्ते । क्वेदं वयः । क्वेयममानुषी शक्तिः । क्व चेदमशेषविद्याग्रहणसामर्थ्यम् । अहो धन्याः प्रजा यासां भरतभगीरथप्रतिमो भवानुत्पन्नः पालयिता । किं खलु कृतमवदातं कर्म वसुंधरया ययासि भर्ता समासादितः । हरिवक्षःस्थलनिवासासद्ग्रहव्यसनिनी हता खलु लक्ष्मीर्या विग्रहवती भवन्तं नोपसर्पति । सर्वथा कल्पकोटीर्महावराह इव दंष्ट्रावलयेन वह बाहुना वसुंधराभारं सह पित्रा । इत्यभिधाय च स्वयमाभरणवसनकुसुमाङ्गरागादिभिरभ्यर्च्य विसर्जयांचकार । विसर्जितश्चोत्थायान्तःपुरं प्रविश्य दृष्ट्वा वैशम्पायनमातरं मनोरमाभिधानां निर्गत्य समारुह्येन्द्रायुधं पित्रा पूर्वकल्पितं प्रतिच्छंदकमिव राजकुलस्योपपादिताशेषगृहप्रवेशमङ्गलं कुमारो भवनं जगाम । गत्वा च श्रीमण्डपावस्थिते शयने मुहूर्तमुपविश्य सह तेन राजलोकेनाभिषेकादिमशनावसानमकरोद्दिवसविधिम् । अभ्यन्तरे च शयनीयगृह एवेन्द्रायुधस्यावस्थानमकल्पयत् । एवं प्रायेण चास्योदन्तेन तदहः परिणतिमुपययौ ।

क्रमेण च प्रतीचीकर्णपूररक्तोत्पले लोकान्तरमुपगते भगवति

गभस्तिमालिनि प्रवृत्ते प्रदोषसमये चन्द्रापीडश्चरणाभ्यामेव राजकुलं गत्वा पितुः समीपे मुहूर्तं स्थित्वा दृष्ट्वा च विलासवतीमागत्य स्वभवनमनेकरत्नप्रभाशबलशयनतलमधिशिश्ये ।

प्रभातायां च निशीथिन्यां समुत्थाय समभ्यनुज्ञातः पित्राभिनवमृगयाकौतुकावकृष्यमाणहृदयो भगवत्यनुदित एव सहस्ररश्मावारुह्येन्द्रायुधं बहुगजतुरगपदातिपरिवृतो वनं ययौ । तत्र च वनवराहान्केसरिणः शरभांश्चमराननेकविधकुरङ्गकांश्च सहस्रशो जघान । अन्यांश्च जीवत एव महाप्राणतया स्फुरतो जग्राह । समारूढे च मध्यमन्हः सवितरि वनात्तमेव मृगयावृत्तान्तमुच्चारयन्स्वभवनमाजगाम ।

अवतीर्य च तुरंगमात्संसंभ्रमप्रधावितपरिजनोपनीते समुपविश्यासने वारबाणमवतार्यापनीय चाशेषं तुरंगाधिरोहिणोचितं वेशपरिग्रहमितस्ततः प्रचलिततालवृन्तपवनापनीयमानश्रमो मुहूर्तं विशश्राम । विश्रम्य च मणिरजतकनककलसशतसनाथामन्तर्विन्यस्तकाञ्चनपीठां स्नानभूमिमगात् । निर्वर्तिताभिषेकव्यापारस्य कृतदेवतार्चनस्याङ्गरागभूमौ समुपविष्टस्य राज्ञा विसर्जिता महाप्रतीहाराधिष्ठिता राजकुलपरिचारकाः कुलवर्धनासनाथाश्च विलासवतीदास्यः सर्वान्तःपुरप्रेषिताश्चान्तःपुरपरिचारिकाः पटलकविनिहितानि विविधान्याभरणानि माल्यान्यङ्गरागान्वासांसि चादाय पुरतस्तस्योपतस्थुरुपनिन्युश्च यथाक्रमम् । आदाय च ताभ्यः प्रथमं स्वयमुपलिप्य वैशम्पायनमुपरचिताङ्गरागो दत्वा च समीपवर्तिभ्यो यथार्हमाभरणवसनाङ्गरागकुसुमानि विविधमणिभाजनसहस्रशारं शारदमम्बरतलमिव स्फुरिततारागणमाहारमण्डपमगच्छत् ।

तत्र च द्विगुणीकृतकुथासनोपविष्टः समीपोपविष्टेन तद्गुणोपवर्णनपरेण वैशम्पायनेन यथार्हभूमिभागोपवेशितेन राजपुत्रलोकेनेदमस्मै दीयतामिदं तस्मै दीयतामिति प्रसादविशेषदर्शनसंवर्धितसेवारसेन च सहाहारवृत्तिमकरोत् । उपस्पृश्य च गृहीतताम्बूलस्तस्मिन्मुहूर्तमिव स्थित्वेन्द्रायुधसमीपमगमत् । तत्र चानुपविष्ट एव तद्गुणोपवर्णनप्रायालापाः कथाः कृत्वा सत्यप्याज्ञाप्रतीक्षणोन्मुखे पार्श्वपरिवर्तिनि परिजने तद्गुणापहृतहृदयः स्वयमेवेन्द्रायुधस्य पुरो यवसमाकीर्य निर्गत्य राजकुलमयासीत् । तेनैव क्रमेणावलोक्य राजानमागत्य निशामनैषीत् ।

अन्येद्युश्च प्रभातसमय एव सर्वान्तःपुराधिकृतमवनिपतेः परमसंमतमनुमार्गागतया च प्रथमे वयसि वर्तमानयानुगम्यमानं कन्यकया कैलासनामानं कञ्चुकिनमायान्तमपश्यत् । स कृतप्रणामः समुपसृत्य क्षितितलनिहितदक्षिणकरो विज्ञापयामास । कुमार महादेवी विलासवती समाज्ञापयति । इयं खलु कन्यका महाराजेन पूर्वं कुलूतराजधानीमवजित्य कुलूतेश्वरदुहिता पत्रलेखाभिधाना बालिका सती बन्दीजनेन सहानीयान्तःपुरपरिचारिकामध्यमुपनीता । सा मया विगतनाथा राजदुहितेति च समुपजातस्नेहया दुहितृनिर्विशेषमियन्तं कालमुपलालिता संवर्धिता च । तदियमिदानीमुचिता भवतस्ताम्बूलकरङ्कवाहिनीति कृत्वा मया प्रेषिता । न चास्यामायुष्मता परिजनसामान्यदृष्टिना भवितव्यम् । बालेव लालनीया स्वचित्तवृत्तिरिव चापलेभ्यो निवारणीया । शिष्येव द्रष्टव्या । सुहृदिव सर्वविश्रम्भेष्वभ्यन्तरीकरणीया । दीर्घकालसंवर्धितस्नेहतया स्वसुतायामिव हृदयमस्यामस्ति मे । बलवानस्यां पक्षपातः । महाभिजन-

राजवंशप्रसूता चार्हतीयमेवंविधानि कर्माणि । नियतं स्वयमेवेयमभिविनीततया कतिपयैरेव दिवसैः कुमारमाराधयिष्यति । केवलमतिचिरकालोपचिता बलवती मे प्रेमवृत्तिरस्यामविदितशीलश्चास्याः कुमार इति संदिश्यते । सर्वथा तथा कल्याणिना प्रयतितव्यं यथेयमतिचिरमुचिता परिचारिका ते भवति । इत्यभिधाय विरतवचसि कैलासे कृताभिजातप्रणामां पत्रलेखामनिमिषलोचनं सुचिरमालोक्य चन्द्रापीडो यथाज्ञापयत्यम्बेत्येवमुक्त्वा कञ्चुकिनं प्रेषयामास ।

पत्रलेखा तु ततःप्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा न रात्रौ न सुप्तस्य नासीनस्य नोत्थितस्य न भ्रमतो न राजकुलगतस्य च्छायेव राजसूनोः पार्श्वं मुमोच । चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत् । अभ्यधिकं च प्रतिदिवसमस्याः प्रसादमकरोत् । आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत ।

एवं समतिक्रामत्सु केषुचिद्दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश । समुपस्थितयौवराज्याभिषेकं च तं कदाचिद्दर्शनार्थमागतमारूढविनयमपि विनीततरमिच्छञ्छुकनासः सविस्तरमुवाच ।

तात चन्द्रापीड विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलं च निसर्गत एवाभानुभेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमदः । अत्यन्ततीव्रो दर्पदाहज्वरोष्मा । सततममूलमन्त्रशम्यो विषमो विनयविषास्वादमोहः । नित्यमस्नानशौचबाध्यो बलवान्रागमदावलेपः इत्यतो विस्तरेणाभिधीयसे ।

गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरंपरा। सर्वाविनयानामेकैकमप्येषामायतनम्। किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः। इन्द्रियहरिणहारिणी च सततमतिदुरन्तेयमुपभोगमृगतृष्णिका। विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य। गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षमजलं स्नानं। नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। अलीकाभिमानोन्मादकारीणि धनानि। राज्यविषविकारतन्द्राप्रदा राज्यलक्ष्मीः।

आलोकयतु तावल्लक्ष्मीमेवं भवान्प्रथमम्। इयमनार्या लब्धापि दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न वैदग्ध्यं गणयति। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। न क्वचिन्निर्भरमाबध्नाति पदम्। यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। न हि तं पश्यामि योऽह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रलब्धः। एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः। सर्वाविनयाधिष्ठानतां च गच्छन्ति। तथाहि। तेषां दाक्षिण्यं

प्रक्षाल्यते । हृदयं मलिनीभवति । सत्यवादितापह्रियते । गुणाश्चोत्सार्यन्ते । केचित्संपद्भिः प्रलोभ्यमाना रागावेशेन बाध्यमाना विह्वलतामुपयान्ति । आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति । अदूरदर्शिनः पापेनैवाध्मातमूर्तयो भवन्ति । तदवस्थाश्च व्यसनशतशरव्यतामुपगताः पतितमप्यात्मानं नावगच्छन्ति ।

अपरे तु स्वार्थनिष्पादनपरैर्धूर्तं विनोद इति प्रमत्तता शौर्यमिति स्वच्छन्दता प्रभुत्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि हसद्भिः प्रतारणकुशलैर्धूर्तैः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यतामुपयान्ति । मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः । नाभिवादयन्त्यभिवादनार्हान् । नाभ्युत्तिष्ठन्ति गुरून् । जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोपदेशम् । आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय । कुप्यन्ति हितवादिने । सर्वथा तमभिनन्दन्ति तं पार्श्वे कुर्वन्ति तं बहुमन्यन्ते तमाप्ततामापादयन्ति योऽहर्निशमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति यो वा माहात्म्यमुद्भावयति ।

तदेवंप्राये राज्यतन्त्रेऽस्मिन्महामोहकारिणि च यौवने कुमार तथा प्रयतेथा यथा नोपहस्यसे जनैर्नोपलभ्यसे सुहृद्भिर्न प्रहस्यसे विटैर्नावलुप्यसे सेवकवृकैर्न प्रलोभ्यसे वनिताभिर्नोन्मत्तीक्रियसे मदनेन नाक्षिप्यसे विषयैर्न विकृष्यसे रागेण नापह्रियसे सुखेन । कामं भवान्प्रकृत्यैव धीरः । पित्रा च महता प्रयत्नेन समारोपितसंस्कारः । तरलहृदयमप्रतिबुद्धमेव मदयन्ति धनानि । तथापि भवद्गुणसंतोषो मामेवं मुखरीकृतवान् । इदमेव च पुनः

पुनरभिधीयसे । विद्वांसमपि धीरमप्यभिजातमपीयं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा पित्रा क्रियमाणमनुभवतु भवान्यौवराज्याभिषेकमङ्गलम् । कुलक्रमागतामुद्वह पूर्वपुरुषरूढां धुरम् । अवनमय द्विषतां शिरांसि । उन्नमय बन्धुवर्गम् । अयं च ते कालः प्रतापमारोपयितुम् । आरूढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति । इत्येतावदभिधायोपशशाम ।

उपशान्तवचसि शुकनासे चन्द्रापीडस्ताभिरमलाभिरुपदेशवाग्भिः प्रक्षालित इवोन्मीलित इव स्वच्छीकृत इवाभिषिक्त इवाभिलिप्त इव निर्मृष्ट इवालंकृत इवोद्भासित इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम ।

ततः कतिपयदिवसापगमे च राजा स्वयमुत्क्षिप्तमङ्गलकलसः सह शुकनासेन पुण्येऽहनि पुरोधसा संपादिताशेषराज्याभिषेकमङ्गलमनेकनरपतिसहस्रपरिवृतः सर्वेभ्यस्तीर्थेभ्यः सर्वाभ्यो नदीभ्यः सर्वेभ्यः सागरेभ्यः समाहृतेन सर्वौषधिभिः सर्वफलैः सर्वमृद्भिः सर्वरत्नैश्च परिगृहीतेनानन्दबाष्पजलमिश्रेण मंत्रपूतेन वारिणा सुतमभिषिषेच । अभिषेकसलिलार्द्रदेहं च तं लतेव पादपान्तरं निजपादपमुञ्चत्यपि तारापीडं तत्क्षणमेव संचक्राम राजलक्ष्मीः । अनन्तरमखिलान्तःपुरपरिवृतया च प्रेमार्द्रहृदयया विलासवत्या स्वयमापादतलाच्चन्दनेनानुलिप्तमूर्तिरिन्दुधवलं दुकूलयुगलं वसानस्तत्कालप्रतिपन्नवेत्रदण्डेन पित्रा स्वयं पुरःप्रारब्धसमुत्सारणः सभामण्डपमुपगम्य काञ्चनमयं चन्द्रापीडः सिंहासनमारुरोह ।

आरूढस्य चास्य कृतयथोचितसकलराजलोकसंमानस्य मुहूर्तं स्थित्वा दिग्विजयप्रयाणशंसी प्रस्थानदुन्दुभिरामन्थरं

दध्वान । यस्य च संत्रस्तलोकपालाकर्णितो बभ्राम त्रिभुवनमखिलं निनादः । ततो दुन्दुभिरवमाकर्ण्य जय जयेति च सर्वतः समुद्घुष्यमाणजयशब्दः सिंहासनात्सह द्विषतां श्रिया संचचाल चन्द्रापीडः । समन्तात्ससंभ्रमोत्थितैश्चानुगम्यमानो नरपतिसहस्रैरास्थानमण्डपान्निरगात् ।

निर्गत्य च पूर्वारूढया पत्रलेखया समध्यासितां करेणुकामधिरुह्यातपत्रेण निवार्यमाणातपो निर्गन्तुमारेभे । विनिर्गतश्च संसभ्रमप्रचलितगजघटासहस्रैराज्ञप्तसेनापतिनिर्दिश्यमाननामभिरवनिभुजां चक्रवालैः प्रणम्यमान इन्द्रायुधेन सनाथीकृतपुरोभागः शनैः शनैः प्रथममेव शातक्रतवीमाशामभिप्रतस्थे । उच्चलितस्य चास्य स्वभवनादुपपादितप्रस्थानमङ्गलो दुकूलवासा महता बलसमूहेन नरेन्द्रवृन्दैश्चानुगम्यमानो धृतधवलातपत्रो द्वितीय इव युवराजो वैशम्पायनः समीपमाजगाम । आगत्य च रजनिकर इव रवेरासन्नवर्ती बभूव । अनन्तरमितश्चेतश्च निर्गतो युवराज इति समाकर्ण्य प्रधावतां बलानां भरेण तत्क्षणमाचकम्पे मेदिनी । भुवनान्तरव्यापिना कलकलेन च महाप्रलयकाल इव संजज्ञे ।

अथालोक्य तदपरिमाणं बलमुपजातविस्मयः सर्वतो दत्तदृष्टिर्वैशम्पायनश्चन्द्रापीडमाबभाषे । किं न जितं युवराज देवेन तारापीडेन यज्जेष्यसि । का दिशो न वशीकृता या वशीकरिष्यसि । कानि दुर्गाणि न प्रसाधितानि यानि प्रसाधयिष्यसि । कानि द्वीपान्तराणि नात्मीकृतानि यान्यात्मीकरिष्यसि । कानि रत्नानि नोपार्जितानि यान्युपार्जयिष्यसि । के वा न प्रणता राजानः । कैर्न विरचितः शिरसि बालकमलकुड्मलकोमलः सेवाञ्जलिः । कैर्न मसृणीकृताः प्रतिबद्धहेमपट्टैर्ललाटैः सभाभुवः ।

कैर्न घृष्टाः पादपीठे चूडामणयः । कैर्न प्रतिपन्ना वेत्रयष्टयः । कैर्नोद्धृतानि चामराणि । कैर्नोच्चारिता जयशब्दाः । केषां न पीताः किरीटपत्रमकरैः सलिलधारा इव निर्मलास्त्वच्चरणनखमयूखराजयः । तथा हि । पश्य यस्यां यस्यां दिशि विक्षिप्यते चक्षुस्तस्यां तस्यां रसातलमिवोद्गिरति वसुधेव सूते ककुभ इव वमन्ति गगनतलमिव वर्षति दिवस इव सृजति बलानि ।

एवं वदत एव तस्य युवराजः समुच्छ्रितानेकतोरणामावासभूमिमवाप । तस्यां चावतीर्य राजवत्सर्वाः क्रियाश्चकार । सर्वैश्च तैः समेत्य नरपतिभिरमात्यैश्च विविधाभिः कथाभिर्विनोद्यमानस्तं दिवसमशेषमभिनवपितृवियोगजन्मना शोकावेगेनायास्यमानहृदयो दुःखेनात्यवाहयत् । अतिवाहितदिवसश्च यामिनीमपि स्वशयनीयस्य नातिदूरे निहितशयननिषण्णेन वैशम्पायनेनान्यतश्च समीपे क्षितितलविन्यस्तकुथप्रसुप्तया पत्रलेखया सहान्तरा पितृसक्तमन्तरा मातृसंबद्धमन्तरा शुकनासमयं कुर्वन्नालापं नात्युपजातनिद्रः प्रायेण जाग्रदेव निन्ये । प्रत्यूषे चोत्थाय तेनैव क्रमेणानवरतप्रयाणकैः प्रतिप्रयाणकमुपचीयमानेन सेनासमुदायेन जर्जरयन्वसुंधरामाकम्पयन्गिरीनुत्सिञ्चन्सरितो रिक्तीकुर्वन्सरांसि चूर्णयन्काननानि समीकुर्वन्विषमाणि दलयन्दुर्गाणि पूरयन्निम्नानि निम्नयन्स्थलानि प्रातिष्ठत । शनैः शनैश्च स्वेच्छया परिभ्रमन्नुन्नतान्नमयन्नाश्वासयन्भीतान्रक्षञ्छरणागतानुन्मूलयन्विटपकानुत्सादयन्कण्टकानभिषिञ्चन्स्थानस्थानेषु राजपुत्रान्समर्जयन्रत्नानि प्रतीच्छन्नुपायनानि गृह्णन्करानादिशन्देशव्यवस्थाः स्थापयन्स्वचिह्नानि कुर्वन्कीर्तनानि लेखयञ्छासनानि पूजयन्नग्रजन्मनः प्रणमन्मुनीन्पालयन्नाश्रमाञ्जनयञ्जनानुरागं प्रकाशयन्विक्रम-

मारोपयन्प्रतापमुपचिन्वन्यशो विस्तारयन्गुणान्प्रख्यापयन्सच्चरितमुद्योतयन्पौरुषमामृद्नन्वेलावनानि बलरेणुभिराधूसरीकृतसकलसागरसलिलः पृथिवीं विचचार। प्रथमं प्राचीं ततस्त्रिशङ्कुतिलकां ततो वरुणलाञ्छनामनन्तरं च सप्तर्षितारशबलां दिशं विजिग्ये। वर्षत्रयेण चात्मीकृताशेषद्वीपान्तरं सकलमेव चतुरम्भोधिखातवलयपरिखाप्रमाणं बभ्राम महीमण्डलम्। ततः क्रमेण निर्जितसकलभुवनतलः प्रदक्षिणीकृत्य वसुधां परिभ्रमन् कदाचित्कैलाससमीपचारिणां हेमजटनाम्नां किरातानां सुवर्णपुरं नाम निवासस्थानं नातिविप्रकृष्टं पूर्वजलनिधेर्जित्वा जग्राह। तत्र च निखिलधरणितलपर्यटनखिन्नस्य निजबलस्य विश्रामहेतोः कतिपयान्दिवसानतिष्ठत्।

एकदा तु तत्रस्थ एवेन्द्रायुधमारुह्य मृगयानिर्गतो विचरन्काननं शैलशिखरादवतीर्णं यदृच्छया किन्नरमिथुनमद्राक्षीत्। अपूर्वदर्शनतया तु समुपजातकुतूहलः कृतग्रहणाभिलाषस्तत्समीपमादरादुपसर्पिततुरगः समुपससर्प। अदृष्टपूर्वपुरुषदर्शनत्रासप्रधावितं च तत्पलायमानमनवरतपार्ष्णिप्रहारद्विगुणीकृतजवेनेन्द्रायुधेनैकाकी निर्गत्य निजबलसमूहात्सुदूरमनुससार। अत्र गृह्यतेऽत्र गृह्यत इदं गृहीतमिदं गृहीतमित्यतिरभसाकृष्टचेता महाजवतया तुरंगमस्य मुहूर्तमात्रेणैकपदमिवासहायस्तस्मात्प्रदेशात्पञ्चदशयोजनमात्रमध्वानं जगाम। तच्चानुबध्यमानं किन्नरमिथुनमालोकयत एवास्य संमुखापतितमचलतुङ्गशिखरमारुरोह।

आरूढे च तस्मिञ्छनैः शनैस्तदनुसारिणीं निवर्त्य दृष्टिमचलशिखरप्रस्तरशकलप्रतिहतगतिप्रसरो विधृततुरंगश्चन्द्रापीड-

स्तस्मिन्काले समुपारूढश्रमस्वेदार्द्रशरीरमिन्द्रायुधमात्मानं चावलोक्य क्षणमिव विचार्य स्वयमेव विहस्याचिन्तयत् । किमिति निरर्थकमयमात्मा मया शिशुनेवायासितः । किमनेन गृहीतेनागृहीतेन वा किन्नरयुगलेन प्रयोजनम् । यदि गृहीतमिदं ततः किमथ न गृहीतं ततोऽपि किम् । अहो मे मूर्खतायाः प्रकारः । अहो यत्किंचनकारितायामादरः । अहो निरर्थकव्यापारेष्वभिनिवेशः । अहो बालिशचरितेष्वासक्तिः । साधुफलं कर्म क्रियमाणं वृथा जातम् । अवश्यकर्तव्या क्रिया प्रस्तुता विफलीभूता । सुहृत्कार्यमुपपाद्यमानं नोपपन्नम् । राजधर्मः प्रवर्तितो न निष्पन्नः । गुर्वर्थः प्रारब्धो न परिसमाप्तः । विजिगीषुव्यापारप्रयत्नो न सिद्धः । कस्मादहमाविष्ट इवोत्सृष्टनिजपरिवार एतावतीं भूमिमायातः । कस्माच्च मया निष्प्रयोजनमिदमनुसृतमश्वमुखद्वयम् । इति विचार्यमाणे यत्सत्यमात्मैव मे पर इव हासमुपजनयति । न जाने कियताध्वना विच्छिन्नमितो बलमनुयायि मे । महाजवो हीन्द्रायुधो निमिषमात्रेणातिदूरमतिक्रामति । न चागच्छता मया तुरगवेगवशात्किन्नरमिथुने बद्धदृष्टिनास्मिन्नविरलतरुशतशाखागुल्मलतासंतानगहने निरन्तरनिपतितशुष्कपर्णावकीर्णतले महावने पन्था निरूपितो येन प्रतिनिवृत्य यास्यामि । न चास्मिन्प्रदेशे प्रयत्नेनापि परिभ्रमता मर्त्यधर्मा कश्चिदासाद्यते यः सुवर्णपुरगामिनं पन्थानमुपदेक्ष्यति । श्रुतं हि मया बहुशः कथ्यमानमुत्तरेण सुवर्णपुरं सीमान्तलेखा पृथिव्याः सर्वजनपदानां ततः परतो निर्मानुषमरण्यं तच्चातिक्रम्य कैलासगिरिरिति । अयं च कैलासः । तदिदानीं प्रतिनिवृत्यैकाकिना स्वयमुत्प्रेक्ष्योत्प्रेक्ष्य दक्षिणामाशां केवल-

मङ्गीकृत्य गन्तव्यम् । आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैवेत्यवधार्य वामकरवलितरश्मिपाशस्तुरंगमं व्यावर्तयामास ।

व्यावर्तिततुरंगश्च पुनश्चिन्तितवान् । अयं भगवान्भानुरधुना दिवसश्रियो रसनामणिरिव मध्यमलंकरोति । परिश्रान्तश्चायमिन्द्रायुधः । तदेनं तावदागृहीतकतिपयदूर्वाप्रवालकवलं कस्मिंश्चित्सरसि शिलाप्रस्रवणे वा सरिदम्भसि वा स्नातपीतोदकमपनीतश्रमं कृत्वा स्वयं च सलिलं पीत्वा कस्यचित्तरोरधश्छायायां मुहूर्तमात्रं विश्रम्य ततो गमिष्यामि । इति चिन्तयित्वा सलिलमन्विष्यन्मुहुर्मुहुरितस्ततो दत्तदृष्टिः पर्यटन्महतो गिरिचरस्य वनगजयूथस्य चरणोत्थापितैः पङ्कपटलैरार्द्रीकृतं मार्गमद्राक्षीत् । उपजातजलाशयशङ्कश्च तं प्रतीपमनुसरन्वेत्रलताप्रतानवता प्ररूढवेणुना कैलासतलेन कंचिदध्वानं गत्वा तस्यैव कैलासशिखरिणः पूर्वोत्तरे दिग्भागे बहुलपक्षक्षपान्धकारमिव पुञ्जीकृतमत्यायतं तरुषण्डं ददर्श । तञ्च संमुखादागतेन शीकरिणा चन्दनरसस्पर्शेनालिङ्ग्यमान इव श्रोत्रहारिभिः कलहंसानां कोलाहलैराहूयमान इव प्रविवेश । प्रविश्य च तस्य तरुषण्डस्य मध्यभागे मणिदर्पणमिव त्रैलोक्यलक्ष्म्याः स्फटिकभूमिगृहमिव वसुंधरादेव्या निर्गमनमार्गमिव सागराणामतिमनोहरमाल्हादनं दृष्टेरच्छोदं नाम सरो दृष्टवान् ।

आलोकमात्रेणैवापगतश्रमो दृष्ट्वा मनस्येवमकरोत् । अहो निष्फलमपि मे तुरगमुखमिथुनानुसरणमेतदालोकयतः सरः सफलतामुपगतम् । अद्य परिसमाप्तमीक्षणयुगलस्य द्रष्टव्यदर्शनफलम् । आलोकितः खलु रमणीयानामन्तः । दृष्ट आल्हादनीया-

नामवधिः । वीक्षिता मनोहराणां सीमान्तलेखा । प्रत्यक्षीकृता प्रीतिजननानां परिसमाप्तिः । विलोकिता दर्शनीयानामवसानभूमिः । इदमुत्पाद्य सरःसलिलममृतरसमुत्पादयता वेधसा पुनरुक्ततामिव नीता स्वसृष्टिः । इदमपि खल्वमृतमिव सर्वेन्द्रियाल्हादनसमर्थम् । अतिविमलतया चक्षुषः प्रीतिमुपजनयति । शिशिरतया स्पर्शसुखमुपाहरति । कमलसुगन्धितया घ्राणमाप्याययति । हंसमुखरतया श्रुतिमानन्दयति । स्वादुतया रसनामाल्हादयति । नियतं चास्यैवदर्शनतृष्णया न परित्यजति भगवान्कैलासनिवासव्यसनमुमापतिः । न खलु सांप्रतमाचरति जलशयनदोहदं देवो रथाङ्गपाणिः यदिदममृतरससुरभिसलिलमपहाय लवणरसपरुषपयस्युदन्वति स्वपिति । नूनं चेदं न प्रथममासीत्सरः येन प्रलयवराहघोणाभिघातभीता भूतधात्री कलशयोनिपानपरिकलितसकलसलिलं सागरमवतीर्णा । अन्यथा यद्यत्रागाधपातालगभीराम्भसि निमग्ना भवेन्महासरसि किमेकेन महावराहसहस्रैरपि नासादिता भवेत् । नूनं चास्मादेव सलिललेशमादायादाय महाप्रलयेषु प्रलयपयोदाः प्रलयदुर्दिनान्धकारितदशदिशः प्लावयन्ति भुवनान्तराणि । मन्ये च यत्तत्सलिलमयं ब्रह्माण्डरूपमादौ भुवनमभूत्तदिदं पिण्डीभूय सरोव्यपदेशेनावस्थितम् ।

इति विचारयन्नेव तस्य दक्षिणं तीरमासाद्य तुरगादवततार । अवतीर्य च व्यपनीतपर्याणमिन्द्रायुधमकरोत् । क्षितितललुठितोत्थितं च गृहीतकतिपययवसग्रासं सरोवतीर्य पीतसलिलमिच्छया स्नातं चोत्थाप्यान्यतमस्य समीपवर्तिनस्तरोर्मूलशाखायामपगतखलीनं हस्तपाशशृङ्खलया कनकमय्या चरणौ बद्ध्वा कृपाणिकावद्धनान्क्षिप्त्वा चाग्रतः कतिचित्सरस्तीरप्ररूढ-

दूर्वाप्रवालकवलान्स्वयमपि सलिलमवततार । ततश्च प्रक्षालितकरचरणयुगलश्चातक इव कृत्वा जलमयमाहारं चक्राह्व इवास्वाद्य मृणालशकलानि शिशिरांशुरिव कराग्रैः स्पृष्ट्वा कुमुदानि फणीवाभिनन्द्य जलतरंगवातानङ्गशरप्रहारातुर इवोरसि निधाय नलिनीदलोत्तरीयमरण्यगज इव शीकरार्द्रपुष्करोपशोभितकरः सरःसलिलादुदगात् । प्रत्यग्रभग्नशिशिरैश्च कमलिनीपलाशैर्लतामण्डपपरिक्षिप्ते शिलातले संस्तरमास्तीर्य निधाय शिरसि पिण्डीकृतमुत्तरीयं निषसाद । मुहूर्तं विश्रान्तश्च तस्य सरस उत्तरे तीरप्रदेशे समुच्चरन्तमुन्मुक्तकवलेन निश्चलश्रवणपुटेन तन्मुखीभूतेनोद्ग्रीवेणेन्द्रायुधेन प्रथममाकर्णितं श्रुतिसुभगं वीणातन्त्रीझंकारमिश्रममानुषं गीतशब्दमशृणोत् । श्रुत्वा च कुतोऽत्र विगतमर्त्यसंपाते प्रदेशे गीतध्वनेः सम्भूतिरिति समुपजातकौतुकः कमलिनीपत्रसंस्तरादुत्थाय तामेव गीतसम्पातसूचितां दिशं चक्षुः प्राहिणोत् । अतिदवीयस्तया तु तस्य प्रदेशस्य प्रयत्नव्यापृतलोचनोऽपि विलोकयन्न किंचिद्ददर्श । तमेव केवलमनवरतं गीतशब्दं शुश्राव । कुतूहलवशाच्च गीतध्वनितप्रभवजिज्ञासया कृतगमनबुद्धिर्दत्तपर्याणमिन्द्रायुधमारुह्य प्रियगीतैः प्रथमप्रस्थितैरप्रार्थितैरपि वनहरिणैरुपदिश्यमानवर्त्मा पश्चिमया सरस्तीरवनलेखया निमित्तीकृत्य तं गीतध्वनिमभिप्रतस्थे ।

क्रमेण च संमुखागतैराह्लादिभिः पुण्यैः कैलासमारुतैरभिनन्द्यमानो गत्वा च तं प्रदेशं सर्वतो मरकतहरितैः पादपैः परिवृतं चन्द्रप्रभनाम्नस्तस्य सरसः पश्चिमे तीरे कैलासपादस्य ज्योत्स्नावदातया प्रभया धवलयतस्तं प्रदेशं तलभागसंनिविष्टं

भगवतः शूलपाणेः शून्यं सिद्धायतनमपश्यत् । तच्च पवनोद्धूतैरितस्ततः समापतद्भिः केतकीगर्भधूलिभिर्धवलीक्रियमाणकायः पशुपतिदर्शनहेतोर्बलादिव प्रतिपाद्यमानो भस्मव्रतमायतनप्रवेशपुण्यैरिव परिगृह्यमाणः प्रविश्याद्राक्षीच्चतुःस्तम्भस्फटिकमण्डपिकातलप्रतिष्ठितमचिरोद्धृतैरार्द्रार्द्रशिखरगलज्जलबिन्दुभिः कृतार्चनमशेषत्रिभुवनवन्दितचरणं चराचरगुरुं चतुर्मुखं भगवन्तं त्र्यम्बकम् ।

तस्य च दक्षिणां मूर्तिमाश्रित्याभिमुखीमासीनामुपरचितब्रह्मासनां निर्मलां निर्ममां निरहंकारां निर्मत्सराममानुपाकृतिं दिव्यत्वादपरिज्ञायमानवयःप्रमाणामप्यष्टादशवर्षदेशीयामिवोपलक्ष्यमाणां प्रतिपन्नपाशुपतव्रतां कन्यकां ददर्श । ततोऽवतीर्य तरुशाखायां बद्ध्वा तुरगमुपसृत्य भगवते भक्त्या प्रणम्य त्रिलोचनाय तामेव दिव्ययोषितमनिमिषपक्ष्मणा निश्चलनिबद्धलक्ष्येण चक्षुषा पुनर्निरूपयामास । उदपादि चास्य तस्या रूपसंपदा कान्त्या प्रशान्त्या चाविर्भूतविस्मयस्य मनसि । अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि । तथा हि । मया मृगयायां यदृच्छया निरर्थकमनुबध्नता तुरगमुखमिथुनमयमतिमनोहरो मानवानामगम्यो दिव्यजनसंचरणोचितः प्रदेशो वीक्षितः क्षितेः । अत्र च सलिलमन्विष्यमाणेन हृदयहारि सिद्धजनोपस्पृष्टजलं सरो दृष्टम् । तत्तीरलेखाविश्रान्तेन चामानुषं गीतमाकर्णितम् । तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्यकेयमालोकिता । न हि मे संशीतिरस्या दिव्यतां प्रति । आकृतिरेवानुमापयत्यस्यामानुषताम् । कुतश्च मर्त्यलोके संभूतिरेवंविधानां गन्धर्वध्वनिविशेषाणाम् । तद्यदि मे सहसा दर्शनपथान्नापयाति नारोहति वा

कैलासशिखरं नोत्पतति वा गगनतलं ततः का त्वं किमभिधाना वा किमर्थं वा प्रथमे वयसि प्रतिपन्ना व्रतमिति सर्वमेवैतदेनामुपसृत्य पृच्छामि । अतिमहानयमवकाश आश्चर्याणाम् । इत्यवधार्य तस्यामेव स्फटिकमण्डपिकायामन्यतमं स्तम्भमाश्रित्य समुपाविष्टो गीतसमाप्त्यवसरं प्रतीक्षमाणस्तस्थौ ।

अथ गीतावसाने मूकीभूतवीणा सा कन्यका समुत्थाय प्रदक्षिणीकृत्य कृतहरप्रणामा परिवृत्य स्वभावधवलया दृष्ट्या समाश्वासयन्ती पुण्यैरिव स्पृशन्ती तीर्थजलैरिव प्रक्षालयन्ती तपोभिरिव पावयन्ती शुद्धिमिव कुर्वाणा वरदानमिवोपपादयन्ती पवित्रतामिव नयन्ती चन्द्रापीडमाबभाषे । स्वागतमतिथये । कथमिमां भूमिमनुप्राप्तो महाभागस्तदुत्तिष्ठागम्यतामनुभूयतामतिथिसत्कार इति । एवमुक्तस्तु तया संभाषणमात्रेणैवानुगृहीतमात्मानं मन्यमान उत्थाय भक्त्या कृतप्रणामो भगवति यथाज्ञापयसीत्यभिधाय दर्शितविनयः शिष्य इव तां व्रजन्तीमनुवव्राज । व्रजंश्च समर्थयामास । हन्त तावन्नेयं मां दृष्ट्वा तिरोभूता । कृतं हि मे कुतूहलेन प्रश्नाशया हृदि पदम् । यथा चेयमस्यास्तपस्विजनदुर्लभदिव्यरूपाया अपि दाक्षिण्यातिशया प्रतिपत्तिरभिजाता विभाव्यते तथा संभावयामि नियतमियमात्मोदन्तमभ्यर्थ्यमाना मया कथयिष्यतीति । एवं च कृतमतिः पदशतमात्रमिव गत्वा निरन्तरैर्दिवापि रजनीसमयमिव दर्शयद्भिस्तमालतरुभिरन्धकारितपुरोभागामिन्दुमण्डलेनेव टङ्कोत्कीर्णेन शङ्खमयेन भिक्षाकपालेनाधिष्ठितां संनिहितभस्मालाबुकां गुहामद्राक्षीत् । तस्याश्च द्वारि शिलातले समुपविष्टो वल्कलशयनशिरोभागविन्यस्तवीणां ततः पर्णपुटेन निर्झरादागृहीतमर्घ्यसलिलमादाय

तां कन्यकां समुपस्थितामलमतियन्त्रणया कृतमतिप्रसादेन भगवति प्रसीद विमुच्यतामयमत्यादरस्त्वदीयमालोकनमपि सर्वपापाप्रशमनमघमर्षणमिव पवित्रीकरणायालमास्यतामित्यब्रवीत् । अनुबध्यमानश्च तया तां सर्वामतिथिसपर्यामतिदूरावनतेन शिरससप्रश्रयं प्रतिजग्राह । कृतातिथ्यया च तया द्वितीयशिलातलोपविष्टया क्षणमिव तूष्णीं स्थित्वा क्रमेण परिपृष्टो दिग्विजयादारभ्य किंनरमिथुनानुसरणप्रसङ्गेनागमनप्रकारमात्मनः सर्वमाचचक्षे । विदितसकलवृत्तान्ता चोत्थाय सा कन्यका भिक्षाकपालमादाय तेषामायतनतरूणां तलेषु विचचार । अचिरेण च तस्याः स्वयंपतितैः फलैरपूर्यत भिक्षाभाजनम् । आगत्य च तेषां फलानामुपयोगाय नियुक्तवती चन्द्रापीडम् । आसीच्च तस्य चेतसि । नास्ति खल्वसाध्यं नाम तपसाम् । किमतः परमाश्चर्यं यदत्र व्यपगतचेतना अपि सचेतना इवास्यै भगवत्यै समतिसृजन्तः फलान्यात्मानुग्रहमुपपादयन्ति वनस्पतयः । चित्रमिदमालोकितमस्माभिरदृष्टपूर्वमित्यधिकतरोपजातविस्मयश्चोत्थाय तमेव प्रदेशमिन्द्रायुधमानीय व्यपनीतपर्याणं नातिदूरे संयम्य निर्झरजलनिर्वर्तितस्नानविधिस्तान्यमृतरसस्वादून्युपयुज्य फलानि पीत्वा च तुषारशिशिरं प्रस्रवणजलमुपस्पृश्य चैकान्ते तावदवतस्थे यावत्तयापि कन्यया कृतो जलफलमूलमयेष्वाहारेषु प्रणयः ।

इति परिसमापिताहारां निर्वर्तितसन्ध्योचिताचारां शिलातले विश्रब्धमुपविष्टां निभृतमुपसृत्य नातिदूरे समुपविश्य मुहूर्तमिव स्थित्वा चन्द्रापीडः सविनयमवादीत् । भगवति त्वत्प्रसादप्राप्तिप्रोत्साहितेन कुतूहलेनाकुलीक्रियमाणो मानुषतासुलभो लघिमा बलादनिच्छन्तमपि मां प्रश्नकर्मणि नियोजयति । जनयति

हि प्रभुप्रसादलवोऽपि प्रागल्भ्यमधीरप्रकृतेः । स्वल्पाप्येकदेशावस्थानकालकला परिचयमुत्पादयति । अणुरप्युपचारपरिग्रहः प्रणयमारोपयति तद्यदि नातिखेदकरमिव ततः कथनेनात्मानमनुग्राह्यमिच्छामि । अतिमहत्खलु भवद्दर्शनात्प्रभृति मे कौतुकमस्मिन्विषये । कतरन्मरुतामृषीणां गन्धर्वाणां गुह्यकानामप्सरसां वा कुलमनुगृहीतं भगवत्या जन्मना । किमर्थं वास्मिन्कुसुमसुकुमारे नवे वयसि व्रतग्रहणम् । क्वेदं वयः । क्वेदं तपः । क्वेयमाकृतिः । क्व चायं लावण्यातिशयः । क्वेयमिन्द्रियाणामुपशान्तिः । तदद्भुतमिव मे प्रतिभाति । किंनिमित्तं वानेकसिद्धसाध्यसंबाधानि सुरलोकसुभगान्यपहाय दिव्याश्रमपदान्येकाकिनी वनमिदममानुषमधिवससि । कश्चायं प्रकारो यत्तैरेव पञ्चभिर्महाभूतैरारब्धमीदृशीं धवलतां धत्ते शरीरम् । नेदमस्माभिरन्यत्र दृष्टश्रुतपूर्वम् । अपनयतु नः कौतुकम् । आवेदयतु भवती सर्वम् । इत्येवमभिहिता सा किमप्यन्तर्ध्यायन्ती तूष्णीं मुहूर्तमिव स्थित्वा निःश्वस्य स्थूलस्थूलैरन्तर्गतां हृदयशुद्धिमिवादाय निर्गच्छद्भिरिन्द्रियप्रसादमिव वर्षद्भिस्तपोरसनिस्यन्दमिव स्रवद्भिर्लोचनविषयं धवलिमानमिव द्रवीकृत्य पातयद्भिरच्छाच्छैरमलकपोलस्थलस्खलितैरवशीर्णहारमुक्तैर्मुक्ताफलतरलपातैरनुबद्धबिन्दुभिर्वल्कलावृतकुचशिखरजर्जरितशीकरैरश्रुभिरामीलितलोचना निःशब्दं रोदितुमारेभे ।

तां च प्ररुदितां दृष्ट्वा चन्द्रापीडस्तत्क्षणमचिन्तयत् । अहो दुर्निवारता व्यसनोपनिपातानां यदीदृशीमप्याकृतिमनभिभवनीयामात्मीयां कुर्वन्ति । सर्वथा न कंचन न स्पृशन्ति शरीरधर्माणमुपतापाः । बलवती हि द्वंद्वानां प्रवृत्तिः । इदमपरमधिकतर-

मुपजनितमतिमहन्मनसि मे कौतुकमस्या बाष्पसलिलपातेन । न ह्यल्पीयसा शोककारणेन क्षेत्रीक्रियन्त एवंविधा मूर्तयः । न हि क्षुद्रनिर्घातपाताभिहता चलति वसुधा । इति संवर्धितकुतूहलश्च शोकस्मरणहेतुतामुपगतमपराधिनमिवात्मानमवगच्छन्नुत्थाय प्रस्रवणादञ्जलिना मुखप्रक्षालनोदकमुपनिन्ये । सा तु तदनुरोधादविच्छिन्नबाष्पजलधारासंतानापि किंचित्कषायितोदरे प्रक्षाल्य लोचने वल्कलोपान्तेन वदनमपमृज्य दीर्घमुष्णं च निःश्वस्य शनैः प्रत्यवादीत् । राजपुत्र किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्यायाः पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन । तथापि यदि महत्कुतूहलं तत्कथयामि । श्रूयताम् ।

एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्तीति । तासां चतुर्दश कुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् । अन्यद्वेदेभ्यः संभूतम् । अन्यदग्नेरुद्भूतम् । अन्यत्पवनात्प्रसूतम् । अन्यदमृतान्मथ्यमानादुत्थितम् । अन्यज्जलाज्जातम् । अन्यदर्ककिरणेभ्यो निर्गतम् । अन्यत्सोमरश्मिभ्यो निष्पतितम् । अन्यद्भूमेरुद्भूतम् । अन्यत्सौदामिनीभ्यः प्रवृत्तम् । अन्यन्मृत्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां सुतानां मध्ये द्वे सुते मुनिररिष्टा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् । एवमेतान्येकत्र चतुर्दश कुलानि । गन्धर्वाणां तु दक्षात्मजाद्वितयसंभवं तदेव कुलद्वयं जातम् । तत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः । स किल सकलत्रिभुवनप्रख्यातपराक्रमो भगवताखण्डलेन सुहृच्छब्देनोप-

बृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यं शैशव एवाप्तवान्। इतश्च नातिदूरे तस्यास्माद्भारतवर्षादुत्तरेणानन्तरे किंपुरुषनाम्नि वर्षे वर्षपर्वतो हेमकूटो नाम निवासः । तत्र च तद्भुजयुगलपरिपालितान्यनेकानि गन्धर्वशतसहस्राणि प्रतिवसन्ति । तेनैव चेदं चैत्ररथं नामातिमनोहरं काननं निर्मितम् । इदं चाच्छोदाभिधानमतिमहत्सरो निखानितम् । अयं च भवानीपतिरुपरचितो भगवान् । अरिष्टायास्तु पुत्रस्तुम्बुरुप्रभृतीनां सोदर्याणां षण्णां ज्येष्ठो हंसो नाम जगद्विदितो गधन्र्वस्तस्मिन्द्वितीये गन्धर्वकुले गन्धर्वराजेन चित्ररथेनैवाभिषिक्तो बाल एव राज्यपदमासादितवान् । अपरिमितगन्धर्वबलपरिवारस्य तस्यापि स एव गिरिराधिवासः । यत्तु तत्सोममयूखसंभवमप्सरसां कुलं तस्मात्किरणजालानुसारगलितेन सकलेनेव रजनिकरकलाकलापलावण्येन निर्मिता त्रिभुवननयनाभिरामा भगवती द्वितीयेव गौरी गौरीति नाम्ना हिमकरकिरणावदातवर्णा कन्यका प्रसूता । तांच द्वितीयगन्धर्वकुलाधिपतिर्हंसो मन्दाकिनीमिव क्षीरसागरः प्रणयिनीमकरोत् । सा तु भगवता मकरकेतनेनेव रतिः शरत्समयेनेव कमलिनी हंसेन संयोजिता सदृशसमागमोपजनितामतिमहतीं मुदमुपगतवती । निखिलान्तःपुरस्वामिनी च तस्याभवत् ।

तयोश्च तादृशयोर्महात्मनोरहमीदृशी विगतलक्षणा शोकाय केवलमनेकदुःखसहस्रभाजनमेकैवात्मजा समुत्पन्ना । तातस्त्वनपत्यतया सुतजन्मातिरिक्तेन महोत्सवेन मम जन्माभिनंदितवान् । अवाप्ते च दशमेऽहनि कृतयथोचितसमाचारो महाश्वेतेति यथार्थमेव नाम कृतवान् । साहं पितृभवने बालतया कल-

मधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं संचरन्त्यविदितशोकायासमनोहरं शैशवमतीतवती। क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधुकरेण मधुकर इव मदेन नवयौवनेन पदम्।

अथ सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेष्वेकदाहमम्बया सह मधुमासविस्तारितशोभमिदमच्छोदं सरः स्नातुमभ्यागमम्। अत्र च स्नानार्थमागतया भगवत्या पार्वत्या तटशिलातलेषु विलिखितानि सभृङ्गिरिटीनि त्र्यम्बकप्रतिबिम्बकानि वन्दमाना रम्योऽयं लतामण्डपः सुपुष्पितोऽयं सहकारतरुः शिशिरेयं चन्दनवीथिका शोभनेयं लतादोलातिरमणीयमिदं तीरतरुतलमिति स्निग्धमनोहरतरोद्देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम्।

अथैकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतमनाघ्रातपूर्वममानुषलोकोचितं कुसुमगन्धमभ्याजिघ्रम्। कुतोऽयमित्युपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कौतुकतरलाभ्यधिकतरोपजातमणिनूपुरझंकाराकृष्टसरःकलहंसानि कतिचित्पदानि गत्वा हरनयनहुताशनेन्धनीकृतमदनशोकविधुरवसन्तमिव तपस्यन्तं मौञ्जमेखलागुणेन परिक्षिप्तजघनभागमलंकारमिव ब्रह्मचर्यस्य यौवनमिव धर्मस्य विलासमिव सरस्वत्याः स्वयंवरपतिमिव सर्वविद्यानां संकेतस्थानमिव सर्वश्रुतीनामात्मानुरूपेण सवयसापरेण देवतार्चनकुसुमान्युच्चिन्वता तापसकुमारेणानुगतमतिमनोहरं स्नानार्थमागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां वसंतदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः कृत्तिकातारास्तबकानुकारिणीममृतबिन्दुनिस्यन्दिनीमदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम् । अस्याः परिभूतान्यकुसुमामोदो नन्वयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाहमचिन्तयम् । अहो रूपातिशयनिष्पादनोपकरणकौशलस्याक्षीणता विधातुः । यत्त्रिभुवनाद्भुतरूपसंभारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरुत्पादितः । मन्ये च सकलजगन्नयनानन्दकरं शशिबिम्बं विरचयता प्रजापतिना प्रथममेतदाकारकरणकौशलाभ्यास एव कृतः । अन्यथा किमिव हि सदृशवस्तुविरचनायाः कारणम् । इति विचिन्तयन्तीमेव मामविचारितगुणदोषविशेषो रूपैकपक्षपाती नवयौवनसुलभः कुसुमायुधः कुसुमासवमद इव मधुकरीं परवशामकरोत् ।

विस्मृतनिमेषेण दक्षिणेन चक्षुषा सस्पृहमापिबन्तीव किमपि याचमानेव त्वदायत्तास्मीति वदन्तीवाभिमुखं हृदयमर्पयन्तीव सर्वात्मनानुप्रविशन्तीव तन्मयतामिव गन्तुमीहमाना मनोभवाभिभूतां त्रायस्वेति शरणमिवोपयान्ती देहि मे हृदयेऽवकाशमित्यर्थितामिव दर्शयन्ती हा हा किमिदमसांप्रतमतिह्रेपणमकुलकुमारीजनोचितमिदं मया प्रस्तुतमिति जानानाप्यप्रभवन्ती करणानां स्तम्भितेव लिखितेवोत्कीर्णेव संयतेव विधृतेव मूर्च्छितेव निष्पन्दसकलावयवा तत्कालाविर्भूतेनावष्टम्भेनाकथितशिक्षितेनानाख्येयेन स्वयंवेद्येन केवलं न विभाव्यते किं तद्रूपसंपदा किं मनसा किं मनसिजेन किमभिनवयौवनेन किमनुरागेणैवोपदिश्यमाना किमन्येनैव वा

केनापि प्रकारेणाहमपि न जानामि कथंकथमिति तमतिचिरं व्यलोकयम्। उत्क्षिप्य नीयमानेव तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन पृष्ठतः प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तप्रयत्नमात्मनमधारयम्।

आसीच्च मम मनसि शान्तात्मनि दूरीकृतसुरतव्यतिकरेऽस्मिञ्जने मां निक्षिपता किमिदमनार्येणासदृशमारब्धं मनसिजेन। एवं च नामातिमूढं हृदयमङ्गनाजनस्य। यदनुरागविषययोग्यतामपि विचारयितुं नालम्। क्वेदमतिभास्वरं धाम तेजसां तपसां च। क्व च प्राकृतजनाभिनन्दितानि मन्मथपरिस्पन्दितानि। नियतमयं मामेवं मकरलाञ्छनेन विडम्ब्यमानामुपहसति मनसा। चित्रं चेदं यदहमेवमवगच्छन्त्यपि न शक्नोम्यात्मनो विकारमुपसंहर्तुम्। अन्या अपि कन्यकास्त्रपामपहाय स्वयमुपयाताः पतीन्। अन्या अप्यनेन दुर्विनीतेन मन्मथेनोन्मत्ततां नीता नार्यः। न पुनरहमेका यथा। कथमनेन क्षणेनाकारमात्रालोकनाकुलीभूतमेवमस्वतन्त्रतामुपैत्यन्तःकरणम्। कालोहि गुणाश्च दुर्निवारतामारोपयन्ति मदनस्य सर्वथा। यावदेव सचेतनास्मि यावदेव च न परिस्फुटमनेन विभाव्यते मे मदनदुश्चेष्टितलाघवमेतत्तावदेवास्मात्प्रदेशादपसरणं श्रेयः। कदाचिदनभिमतस्मरविकारदर्शनकुपितोऽयं शापाभिज्ञां करोति माम्। अदूरकोपा हि मुनिजनप्रकृतिः। इत्यवधार्यापसरणाभिलाषिण्यहमभवम्। अशेषजनपूजनीया चेयं जातिरिति कृत्वा तद्वदनाकृष्टदृष्टिप्रसरमस्मै प्रणाममकरवम्।

अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया भगवतो मनोभुवो मदजननतया च मधुमासस्यातिरमणीयतया च तस्य प्रदे-

शस्याविनयबहुलतया चाभिनवयौवनस्य चञ्चलप्रकृतितया चेन्द्रियाणां दुर्निवारतया च विषयाभिलाषाणां चपलतया च मनोवृत्तेस्तथाभवितव्यतया च तस्य तस्य वस्तुनः किं बहुना मम भाग्यदौरात्म्यादस्य चेदृशस्य क्लेशस्य विहितत्वात्तमपि मद्विकारदर्शनापहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः । तदा तस्याप्यभिनवागतं मदनं प्रत्युद्गच्छन्निव रोमोद्गमः प्रादुरभवत् । मत्सकाशमभिप्रस्थितस्य मनसो मार्गमिवोपदिशद्भिः पुरः प्रवृत्तं श्वासैः । वेपथुगृहीता व्रतभङ्गभीतेवाकंपत करतलगताक्षमाला । तया तु तस्यातिप्रकटया विकृत्या द्विगुणीकृतमदनावेशा तत्क्षणमहमवर्णनयोग्यां कामप्यवस्थामन्वभवम् । इदं च मनस्यकरवम् । मकरकेतुरेव विलासानुपदिशति । अन्यथा विविधरसासङ्गललितेष्वपीदृशेषु व्यतिकरेष्वप्रविष्टबुद्धेरस्य जनस्य कुत इवेयमनभ्यस्ताकृती रतिरसनिष्यन्दमिव क्षरन्त्यमृतमिव वर्षन्ती मदमुकुलितेव खेदालसेव निद्राजडेवानन्दभरमंथरतरलतरसंचारिण्यनिभृतभ्रूलतालासिनी दृष्टिः । कुतश्चेदमतिनैपुण्यं यच्चक्षुषैवानक्षरमेवमन्तर्गतो हृदयाभिलाषः कथ्यते ।

प्राप्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम् । भगवन् किमभिधानः कस्य वायं तपोधनस्य युवा । किंनाम्नश्च तरोरियमनेनावतंसीकृता कुसुममञ्जरी । जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोयमनाघ्रातपूर्वो गन्ध इति । स तु मामीषद्विहस्याब्रवीत् । बाले किमनेन पृष्टेन प्रयोजनम् । अथ कौतुकमावेदयामि । श्रूयताम् ।

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्तिरत्युदारतपाः सुरा-

सुरसिद्धवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम । तस्य भगवतः सुरासुरलोकसुन्दरीहृदयानन्दकरमशेषत्रिभुवनसुन्दरमतिशयितनलकूबरं रूपमासीत् । स कदाचिद्देवतार्चनकमलान्युद्धर्तुं मन्दाकिनीमवततार । अवतरन्तं च तदा कमलवनेषु सततसंनिहिता विकचसहस्रपुण्डरीकोपविष्टा देवी लक्ष्मीर्ददर्श । तस्यास्तु तमवलोकयन्त्या मन्मथविकृतं मन आसीत् । आलोकनमात्रेण च समासादितसुरतसमागमसुखायास्तस्मिन्नेवासनीकृते पुण्डरीके कृतार्थताऽसीत् । तस्माच्च कुमारः समुदपादि । ततस्तमुत्सङ्गेनादाय सा भगवन्गृहाण तवायमात्मज इत्युक्त्वा तस्मै श्वेतकेतवे ददौ । असावपि बालजनोचिताः सर्वाः क्रियाः कृत्वा तस्य पुण्डरीकसंभवतया तदेव पुण्डरीक इति नाम चक्रे । प्रतिपादितव्रतं तमागृहीतसकलविद्याकलापमकार्षीत् । सोऽयम् ।

इयं च सुरासुरैर्मथ्यमानात्क्षीरसागरादुद्गतः पारिजातनामा पादपस्तस्य मञ्जरी । यथा चैषा व्रतविरुद्धमस्य श्रवणसंसर्गमासादितवती तदपि कथयामि । अद्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितुममरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्निर्गत्य नन्दनवनदेवतया पारिजातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितः । भगवन्सकलत्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सुसदृशोऽयमलंकारः । इयं समारोप्यतां श्रवणशिखरम् । व्रजतु सफलतां जन्म पारिजातस्येति । एवमभिदधानां चायमात्मरूपस्तुतिवादत्रपावनमितविलोचनस्तामनादृत्यैव गन्तुं प्रवृत्तः । मया तु तामनुयान्तीमालोक्य को दोषः सखे क्रियतामस्याः प्रणयपरिग्रह इत्यभिधाय

बलादियमनिच्छतोऽप्यस्य कर्णपूरीकृता । तदेतत्कार्त्स्न्येन योऽयं यस्य चायं या चेयं यथा चास्य श्रवणशिखरं समारूढा तत्सर्वमावेदितम् ।

इत्युक्तवति तस्मिन्स तपोधनयुवा किंचिदुपदर्शितस्मितो मामवादीत् । अयि कुतूहलिनि किमनेन प्रश्नायासेन । यदि रुचितसुरभिपरिमला गृह्यतामियम् । इत्युक्त्वा समुपसृत्यात्मीयाच्छ्रवणादपनीय मदीये श्रवणपुटे तामकरोत् । मम तु तत्करतलस्पर्शलोभेन तत्क्षणमपरमिव पारिजातकुसुमावतंसस्थाने पुलकमासीत् । स च मत्कपोलस्पर्शसुखेन तरलीकृतांगुलिजालकात्करतलादक्षमालां लज्जया सह गलितामपि नाज्ञासीत् । अथाहं तामसंप्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं तद्भुजपाशसंदानितकण्ठग्रहसुखमिवानुभवन्ती दर्शितापूर्वहारलतालीलां कण्ठाभरणतामनयम् ।

इत्थंभूते च व्यतिकरे छत्रग्राहिणी मामवोचत् । भर्तृदारिके स्नाता देवी । प्रत्यासीदति गृहगमनकालः । तत्क्रियतां मज्जनविधिरिति । अहं तु तेन तस्या वचनेन नवग्रहा करिणीव प्रथमाङ्कुशपातेनानिच्छयापि कथं कथमपि समाकृष्यमाणा तन्मुखाद्दृष्टिमाकृष्य स्नातुमुदचलम् । उच्चलितायां च मयि द्वितीयो मुनिदारकस्तथाविधं तस्य धैर्यस्खलितमालोक्य किंचित्प्रकटितप्रणयकोप इवावादीत् ।

सखे पुण्डरीक नैतदनुरूपं भवतः । क्षुद्रजनक्षुण्ण एष मार्गः । धैर्यधना हि साधवः । किं यः कश्चित्प्राकृत इव विक्लवीभवन्तमात्मानं न रुणत्सि । कुतस्तवापूर्वोऽयमद्येन्द्रियोपप्लवो येनास्यैवं

कृतः । क्व ते तद्धैर्यम् । क्वासाविन्द्रियजयः । क्व तद्वशित्वं चेतसः। क्व सा सर्वविषयनिरुत्सुकता। क्व ते गुरूपदेशाः। क्व तानि श्रुतानि। क्व ता वैराग्यबुद्धयः। क्व तदुपभोगविद्वेषित्वम् । क्व सा सुखपराङ्मुखता। क्वासौ तपस्यभिनिवेशः । क्व सा संयमिता । क्व सा भोगानामुपर्यरुचिः। क्व तद्यौवनानुशासनम्। सर्वथा निष्फला प्रज्ञा। निर्गुणो धर्मशास्त्राभ्यासः। निरर्थकः संस्कारः। निरुपकारको गुरूपदेशविवेकः । निष्प्रयोजना प्रबुद्धता । निष्कारणं ज्ञानम्। यदत्र भवादृशा अपि रागाभिषङ्गैः कलुषीक्रियन्ते प्रमादैश्चाभिभूयन्ते। कथं करतलाद्गलितामपहृतामक्षमालामपि न लक्षयसि । अहो विगतचेतनत्वम्। अपहृता नामेयम् । इदमपि तावदपह्रियमाणमनयानार्यया निवार्यतां हृदयमिति।

एवमभिधीयमानश्च तेन किंचिदुपजातलज्ज इव प्रत्यवादीत् । सखे कपिञ्जल किं मामन्यथा संभावयसि । नाहमेवमस्या दुर्विनीतकन्यकाया मर्षयाम्यक्षमालाग्रहणापराधमिमम् । इत्यभिधायालीककोपकान्तेन प्रयत्नविरचितभीषणभ्रुकुटिभूषणेन चुम्बनाभिलाषस्फुरिताधरेण मुखेन्दुना मामवदत् । चपले प्रदेशादस्मादिमामक्षमालामदत्वा पदात्पदमपि न गन्तव्यमिति । तच्च श्रुत्वाहमात्मकण्ठादुन्मुच्यैकावलीं भगवन्गृह्यतामक्षमालेति मन्मुखासक्तदृष्टेः शून्यहृदयस्यास्य प्रसारितपाणौ निधाय स्वेदसलिलस्नातापि पुनः स्नातुमवातरम् । उत्थाय च कथमपि प्रयत्नेन निम्नगेव प्रतीपं नीयमाना सखीजनेन बलादम्बया सह तमेव चिन्तयन्ती स्वभवनमयासिषम् । गत्वा च प्रविश्य कन्यान्तःपुरं ततःप्रभृति तद्विरहविधुरा किमागतास्मि किं तत्रैव स्थितास्मि किमेकाकिन्यस्मि किं परिवृतास्मि किं तूष्णीमस्मि

किं प्रस्तुतालापास्मि किं जागर्मि किं सुप्तास्मि किं रोदिमि किं न रोदिमि किं दुःखमिदं किं सुखमिदं किमुत्कण्ठेयं किं व्याधिरयं किं व्यसनमिदं किमुत्सवोऽयं किं दिवस एष किं निशेयं कानि रम्याणि कान्यरम्याणीति सर्वं नावागच्छम् । अविज्ञातमदनवृत्तान्ता च क्व गच्छामि किं करोमि किं शृणोमि किं पश्यामि किमालपामि कस्य कथयामि कोऽस्य प्रतीकार इति सर्वं च नाज्ञासिषम् । केवलमारुह्य कुमारीपुरप्रासादं विसर्ज्य च सखीजनं द्वारि निवारिताशेषपरिजनप्रवेशा सर्वव्यापारानुत्सृज्यैकाकिनी मणिजालगवाक्षनिक्षिप्तमुखी तामेव दिशं तत्सनाथतया प्रसाधितामिव दर्शनसुभगामीक्षमाणा तस्माद्दिगन्तरादागच्छन्तमनिलमपि वनकुसुमपरिमलमपि शकुनिध्वनिमपि तद्वार्तां प्रष्टुमीहमाना तद्वल्लभतया तपःपरिक्लेशायापि स्पृहयन्ती तत्प्रीत्येव गृहीतमौनव्रता स्मरजनितपक्षपाता तत्परिग्रहान्मुनिवेशस्याग्राम्यतां तदास्पदतया यौवनस्य चारुतां तच्छ्रवणसंपर्कात्पारिजातकुसुमस्य मनोहरतां तन्निवासात्सुरलोकस्य रम्यतां तद्रूपसंपदा कुसुमायुधस्य दुर्जयतामध्यारोपयन्ती दूरस्थापि कमलिनीव सवितुः सागरवेलेव चन्द्रमसो मयूरीव जलधरस्य तस्यैवाभिमुखी तथैव तां तद्विरहातुरजीवितोद्गमरक्षावलीमिवाक्षावलीं कण्ठेनोद्वहन्ती तथैव च तया प्रस्तुततद्रहस्यालापयेव कर्णलग्नया पारिजातमञ्जर्या तथैव च तेन तत्करतलस्पर्शसुखजन्मना कदम्बमुकुलकर्णपूरायमाणेन रोमाञ्चजालेन कण्टकितैककपोलफलका निष्पन्दमतिष्ठम् ।

अथ ताम्बूलकरङ्कवाहिनी मदीया तरलिका नाम मयैव सह गता स्नातुमासीत् । सा च पश्चाच्चिरादिवागत्य तथावस्थितां

शनैर्मामवादीत्। भर्तृदारिके यौ तौ तापसकुमारकौ दिव्याकारावस्माभिरच्छोदसरस्तीरे दृष्टौ तयोरेको येन भर्तृदुहितुः श्रवणावतंसीकृता सुरतरुकुसुममञ्जरी स तस्माद्द्वितीयादात्मनो रक्षन्दर्शनमतिनिभृतपदः कुसुमितलतासंतानगहनान्तरेणोपसृत्य मामागच्छन्तीं पृष्ठतो भर्तृदारिकामुद्दिश्याप्राक्षीत्। बालिके केयं कन्यका कस्य वापत्यं किमभिधाना क्व वा गच्छतीति। मयोक्तमेषा खलु भगवतः श्वेतभानोरंशुभूतायामप्सरसि गौर्यां समुत्पन्ना देवस्य गन्धर्वाधिपतेर्हंसस्य दुहिता महाश्वेता नाम गन्धर्वाधिवासं हेमकूटमचलवरमभिप्रस्थिता। इति कथिते च मया किमपि चिन्तयन्मुहूर्तमिव तूष्णीं स्थित्वा विगतनिमेषेण चक्षुषा चिरमिवाभिवीक्षमाणो मां सानुनयमर्थितामिव दर्शयन्पुनराह। बालिके कल्याणिनि तवाविसंवादिन्यचपला बालभावेऽप्याकृतिरियम्। तत्करोषि मे वचनमेकमभ्यर्थ्यमानेति। ततो मया सविनयमुपरचिताञ्जलिपुटया दर्शितादरमभिहितः। भगवन्कस्मादेवमभिधत्से। काहम्। महात्मानः सकलत्रिभुवनपूजनीयास्त्वादृशाः पुण्यैर्विना निखिलकल्मषापहारिणीमस्मद्विधेषु दृष्टिमपि न पातयन्ति किं पुनराज्ञाम्। तद्विश्रब्धमादिश्यतां कर्तव्यम्। अनुगृह्यतामयं जन इति। एवमुक्तश्च मया सस्नेहया सखीमिवोपकारिणीमिव प्राणप्रदामिव दृष्ट्या मामभिनन्द्य निकटवर्तिनस्तमालपादपात्पल्लवमादाय निष्पीड्य शिलातले तेन गन्धगजमदसुरभिपरिमलेन रसेनोत्तरीयवल्कलैकदेशाद्विपाट्य पट्टिकां स्वहस्तकमलकनिष्ठिकानखशिखरेणाभिलिख्येयं पत्रिका त्वया तस्यै कन्यकायै प्रच्छन्नमेकाकिन्यै देयेत्यभिधायार्पितवान्। इत्युक्त्वा च सा ताम्बूलभाजनादाकृष्य तामदर्शयत्। अहं तु तेन तत्संबं-

धिनालापेन शब्दमयेनापि स्पर्शसुखमिवान्तर्जनयता श्रोत्रविषयेणापि रोमोद्गमानुमितसर्वाङ्गानुप्रवेशेन मदनावेशमन्त्रेणेवाविश्यमाना तस्याः करतलादादाय तां वल्कलपट्टिकां तस्यामिमामभिलिखितामार्यामपश्यम् ।

दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥

अनया च मे दृष्टया दोषविकारोपचयः सुतरामक्रियत स्मरानुरक्तस्य मे मनसः । येनाकुलीक्रियमाणा सरिदिव पूरेण विह्वलतामभ्यागमम् । तां च द्वितीयदर्शनेन कृतमहापुण्यामिव मन्यमाना सततसंनिहितामपि दुर्लभदर्शनामिवातिपरिचितामप्यपूर्वामिव सादरमाभाषमाणा पार्श्वस्थामपि सर्वलोकस्योपर्यवस्थितामिव पश्यन्ती कपोलयोरलकलताभङ्गेषु च सोपग्रहं स्पृशन्ती विपरीतमिव परिजनस्वामिसंबन्धमुपदर्शयन्ती तरलिके कथय कथं स त्वया दृष्टः किं किमभिहितासि तेन कियन्तं कालमवस्थितासि तत्र कियदनुसरन्नस्मानसावागत इति पुनः पुनः पर्यपृच्छम् । अनयैव च कथया तया सह तस्मिन्नेव प्रासादे तथैव प्रतिषिद्धाशेषपरिजनप्रवेशा दिवसमत्यवाहयम् ।

अथास्तं गते भगवति रवौ सा छत्रग्राहिणी समागत्याकथयत् । भर्तृदारिके तयोर्मुनिकुमारयोरन्यतरो द्वारि तिष्ठति कथयति चाक्षमालामुपयाचितुमागतोऽस्मीति । अहं तु मुनिकुमारनामग्रहणादेव स्थानस्थितापि गतेव द्वारदेशं समुपजाततदागमनाशङ्का समाहूयान्यतमं कञ्चुकिनं गच्छ प्रवेशयतामित्यादिश्य प्राहिणवम् । अथ मुहूर्तादिव तं तस्य सखायमृषिकुमारं कपिञ्जलनामानं जराधवलितस्य कञ्चुकिनोऽनुमार्गेणागच्छन्तमप-

श्यम् । अन्तिकमुपगतस्य चास्य पर्याकुलमिव सविषादमिव शून्यमिवार्थिनमिवान्तर्गताकूतमाकारमलक्षयम् । उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम् । उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावपमृज्य चोत्तरीयांशुकपल्लवेनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत् । अहं तु विदिताभिप्राया दृष्ट्वैव भगवन्नव्यतिरिक्तेयमस्मच्छरीरादशङ्कितमभिधीयतामित्यवोचम् ।

एवमुक्तस्तु मया कपिञ्जलः प्रत्यवादीत् । राजपुत्रि किं ब्रवीमि । वागेव मे नाभिधेयविषयमवतरति त्रपया । क्व कन्दमूलफलाशी शान्तो वनवासनिरतो मुनिजनः क्व वायमशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलास संकटो रागप्रायः प्रपञ्चः । सर्वमेवानुपपन्नमालोकय किमारब्धं दैवेन । अयत्नेनैव खलूपहासास्पदतामीश्वरो नयति जनम् । न जाने किमिदं वल्कलानां सदृशमुताहो जटानां समुचितम् । किं तपसोऽनुरूपमाहोस्विद्धर्मकर्मोपदेशाङ्गमिदम् । अपूर्वेयं विडम्बना केवलमवश्यकथनीयमिदम् । अपर उपायो न दृश्यते । अन्या प्रतिक्रिया नोपलभ्यते। अन्यच्छरणं नालोक्यते। अन्या गतिर्नास्ति। अकथ्यमाने च महाननर्थोपनिपातो जायते । प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि । अस्ति भवत्याः समक्षमेव स मया तथा निष्ठुरमुपदर्शितकोपेनाभिहितः । तथा चाभिधाय परित्यज्य तं तस्मात्प्रदेशादुपजातमन्युरुत्सृष्टकुसुमावचयोऽन्यं प्रदेशमगमम् । अपयातायां भवत्यां मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति संजातवितर्कः प्रतिनिवृत्य विटपान्तरित-

बिग्रहस्तं प्रदेशं व्यलोकयम् । यावत्तत्र तं नाद्राक्षमासीच्च मे मनस्येवं किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन्गतो भवेत् । गतायां च तस्यां लब्धचेतनो लज्जया न शक्नोति मे दर्शनपथमुपगन्तुमाहोस्वित्कुपितः परित्यज्य मां गतः । उतान्वेषमाणो मामेव प्रदेशमन्यमितः समाश्रितः स्यादित्येवं विकल्पयन्कंचित्कालमतिष्ठम् । तेन तु जन्मनः प्रभृत्यनभ्यस्तेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम् । स कदाचिद्धैर्यस्खलनविलक्षः किंचिदनिष्टमपि समाचरेत् । न हि किंचिन्न क्रियते ह्रिया । तन्न युक्तमेनमेकाकिनं कर्तुम् । इत्यवधार्यान्वेष्टुमादरमकरवम् । अन्वेषमाणश्च यथा यथा नापश्यं तं तथा तथा सुहृत्स्नेहकातरेण मनसा तत्तदशोभनमाशङ्कमानस्तरुलतागहनानि चन्दनवीथिका लतामन्डपान्सरःकूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरं व्यचरम् ।

अथैकस्मिँल्लतागहने कृतावस्थानमुत्सृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव प्रसुप्तमिव योगसमाधिस्थमिव मदनमयमिव परायत्तचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशस्यानभिज्ञेयपूर्वाकारं तमहमद्राक्षम् ।

अपगतनिमेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन हृदयेनाचिन्तयम् । एवं नामायमतिदुर्विषहवेगो मकरकेतुर्येनानेन क्षणेनायमीदृशमवस्थान्तरमप्रतीकारमुपनीतः । कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिः । अहो बत महच्चित्रम् । तथा नामायमाशैशवाद्धीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषां च मुनिकुमारकाणां स्पृहणीयचरित आसीत् । अद्य त्वितर इव परिभूय ज्ञानमविगणय्य तपःप्रभावमुन्मूल्य

गाम्भीर्यं मन्मथेन जडीकृतः । सर्वथा दुर्लभं यौवनमस्खलितमिति । उपसृत्य च तस्मिन्नेव शिलातलैकपार्श्वे समुपविश्यांसदेशावसक्तपाणिस्तमनुन्मीलितलोचनमेव सखे पुण्डरीक कथय किमिदमित्यपृच्छम् । अथ सुचिरसंमीलनाल्लग्नमिव कथमपि प्रयत्नेनानवरतरोदनवशादुपजातारुणभावमश्रुजलपूरप्लावितमुत्कुपितमिव स्वच्छांशुकान्तारितरक्तकमलवनच्छायं चक्षुरुन्मील्य मन्थरया दृष्ट्या सुचिरं विलोक्य मामायततरं निश्वस्य लज्जाविशीर्यमाणविरलाक्षरं सखे कपिञ्जल विदितवृत्तान्तोऽपि किं मां पृच्छसीति कृच्छ्रेण शनैरवदत् । अहं तदाकर्ण्य तदवस्थयैवाप्रतीकारविकारोऽयं तथापि सुहृदा सुहृदसन्मार्गप्रवृत्तो यावच्छक्तितः सर्वात्मना निवारणीय इति मनसावधार्याब्रवम् ।

सखे पुण्डरीक सुविदितमेतन्मम । केवलमिदमेव पृच्छामि । यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टम् । उत धर्मशास्त्रपठितम् । उत धर्मार्जनोपायोऽयम् । उतापरस्तपसां प्रकारः । उत स्वर्गगमनमार्गोऽयम् । उत व्रतरहस्यमिदम् । उत मोक्षप्राप्तियुक्तिः । आहोस्विदन्यो नियमप्रकारः । कथमेतद्युक्तं भवतो मनसापि चिन्तयितुं किं पुनराख्यातुमीक्षितुं वा । कथय किमप्रबुद्ध इवानेन मन्मथहतकेनोपहासास्पदतां नीयमानमात्मानं नावबुध्यसे । मूढो मदनेनायास्यते । का वा सुखाशा साधुजननिन्दितेष्वेवंविधेषु विषयेषु भवतः । स खलु धर्मबुद्ध्या विषलतावनं सिञ्चति । कुवलयमालेति निस्त्रिंशलतामालिङ्गति । कृष्णागुरुधूमलेखेति कृष्णसर्पमवगूहते । महारत्नमिति ज्वलन्तमङ्गारमभिस्पृशति । मृणालमिति दुष्टवारणदन्तमुसलमुन्मूलयति । मूढो विषयोपभोगेष्वनिष्टानुबन्धिषु यः परिणतिविरसेषु सुख-

बुद्धिमारोपयति । अधिगतविषयतत्त्वोऽपि कस्मात्खद्योत इव ज्योतिर्निर्वीर्यमिदं ज्ञानमुद्वहसि । यतो न निवारयसि प्रबलरजःप्रसरकलुषितानि स्रोतांसीवोन्मार्गप्रस्थितानीन्द्रियाणि न नियमयसि वा क्षुभितं मनः । कोऽयमनङ्गो नाम । धैर्यमवलम्ब्य निर्भर्त्स्यतामयं दुराचार इति । एवं वदत एव मे वचनमाक्षिप्य प्रतिपक्ष्मान्तरालप्रवृत्तबाष्पवेणिकं प्रमृज्य चक्षुः करतलेन पाणौ मामवलम्ब्यावोचत् । सखे किं बहुनोक्तेन सर्वथा सुस्थोऽसि । आशीविषविषवेगविषमाणामेषां कुसुमचापसायकानां पतितोऽसि न गोचरे । सुखमुपदिश्यते परस्य । यस्य चेन्द्रियाणि सन्ति मनो वा विद्यते यः पश्यति वा शृणोति वा श्रुतमवधारयति वा यो वा शुभमिदं न शुभमिदमिति विवेक्तुमलं स खलूपदेशमर्हति । मम तु सर्वमेवेदमतिदूरापेतम् । अवष्टम्भो ज्ञानं धैर्यं प्रतिसंख्यानमित्यस्तमितैषा कथा । कथमप्येवमेवायत्नविधृतास्तिष्ठन्त्यसवः । दूरातीतः खलूपदेशकालः समतिक्रान्तो धैर्यावसरः । गता प्रतिसंख्यानवेला । अतीतो ज्ञानावष्टम्भसमयः । केन वान्येनास्मिन्समये भवन्तमपहायोपदेष्टव्यमुन्मार्गप्रवृत्तिनिवारणं वा करणीयम् । कस्यान्यस्य वा वचसि मया स्थातव्यम् । को वापरस्त्वत्समो मे जगति बन्धुः । किं करोमि । यन्न शक्नोमि निवारयितुमात्मानम् । इयमनेनैव क्षणेन भवता दृष्टावस्था । तद्गत इदानीमुपदेशकालः । यावत्प्राणिमि तावदस्य कल्पान्तोदितद्वादशदिनकरकिरणातपतीव्रस्य मदनसंतापस्य प्रतिक्रियां क्रियमाणामिच्छामि । पच्यन्त इव मेऽङ्गानि । उत्क्वथ्यत इव हृदयम् । प्लुष्यत इव दृष्टिः । ज्वलतीव शरीरम् । अत्र यत्प्राप्तकालं तत्करोतु भवान् । इत्यभिधाय तूष्णीमभवत् ।

एवमुक्तोऽप्यहमेनं प्राबोधयं पुनः पुनः । यदा शास्त्रोपदेशविशदैः सनिदर्शनैः सेतिहासैश्च वचोभिः सानुनयं सोपग्रहं चाभिधीयमानोऽपि नाकरोत्कर्णे तदाहमचिन्तयम् । अतिभूमिमयं गतो न शक्यते निवर्तयितुम् । इदानीं निरर्थकाः खलूपदेशाः । तत्प्राणपरिरक्षणेऽपि तावदस्य यत्नमाचरामीति कृतमतिरुत्थाय गत्वा तस्मात्सरसः सरसा मृणालिकाः समुद्धृत्य कमलिनीपलाशानि जललवलाञ्छितानि चादाय तस्मिन्नेव लतागृहशिलातले शयनमस्याकल्पयम् । तत्र च सुखनिषण्णस्य प्रत्यासन्नवर्तिनां चन्दनविटपिनां मृदूनि किसलयानि निष्पीड्य तेन स्वभावसुरभिणा तुषारशिशिरेण रसेन ललाटिकामकल्पयम् । आचरणतलादङ्गचर्चां चारचयम् । अभ्यर्णपादपस्फुटितवल्कलविवरशीर्णेन च करसंचूर्णितेन कर्पूररेणुना स्वेदप्रतीकारमकरवम् । उरोनिहितचन्दनद्रवार्द्रवल्कलस्य स्वच्छसलिलसीकरस्राविणा कदलीदलेन व्यजनक्रियामन्वतिष्ठम् । एवं च मुहूर्मुहुरन्यदन्यन्नलिनीदलशयनमुपकल्पयतो मुहुश्चन्दनचर्चामारचयतो मुहुर्मुहुश्च स्वेदप्रतिक्रियां कुर्वतः कदलीदलेन चानवरतं वीजयतः समुदभून्मे मनसि चिन्ता । नास्ति खल्वसाध्यं नाम भगवतो मनोभुवः । क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः । क्व च विविधविलासरसराशिर्गन्धर्वराजपुत्री महाश्वेता । सर्वथा न हि किंचिदस्य दुर्घटं दुष्करमनायत्तमकर्तव्यं वा जगति । दुरुपपादेष्वप्यर्थेष्वयमवज्ञया विचरति । न चायं केनापि प्रतिकूलयितुं शक्यते । का वा गणना सचेतनेषु । अपगतचेतनान्यपि संघट्टयितुमलं यद्यस्मै रोचते । कुमुदिन्यपि

दिनकरकरानुरागिणी भवति । कमलिन्यपि शशिकरद्वेषमुज्झति । निशापि वासरेण सह मिश्रतामेति । ज्योत्स्नाप्यन्धकारमनुवर्तते । जरापि यौवनेन संचारिणी भवति । किं वा तस्य दुःसाध्यमपरम् । एवंविधो येनायमगाधगाम्भीर्यसागरस्तृणलवलघुतामुपनीतः । क्व तत्तपः । क्वेयमवस्था । सर्वथा निष्प्रतिकारेयमापदुपस्थिता । किमिदानीं कर्तव्यम् । किमाचेष्टितव्यम् । कां दिशं गन्तव्यम् । किं शरणम् । कश्चोपायः । कः सहायः । कः प्रकारः । का युक्तिः । कः समाश्रयः । येनास्यासवः संधार्यन्ते । केन वा कौशलेन कतमया वा युक्त्या कतरेण वा प्रकारेण केन वावष्टम्भेन कया वा प्रज्ञया कतमेन वा समाश्वासनेनायं जीवेदिति । एते चान्ये च मे विषण्णहृदयस्य संकल्पाः प्रादुरासन् । पुनश्चाचिन्तयम् । किमनयात्यन्तायतया निष्प्रयोजनया चिन्तया । प्राणास्तावदस्य येन केनचिदुपायेन शुभेनाशुभेन वा रक्षणीयाः । तेषां च त्वत्समागममेकमपहाय नास्त्यपरः संरक्षणोपायः । बालभावादप्रगल्भतया च तपोविरुद्धमनुचितमुपहासमिवात्मनो मदनव्यतिकरं मन्यमानो नियतमेकोच्छ्वासावशेषजीवितोऽपि नायं तस्याः स्वयमभिगमनेन पूरयति मनोरथम् । अकालान्तरक्षमश्चायमस्य मदनविकारः । सततमतिगर्हितेनाकृत्येनापि परिरक्षणीयान्मन्यन्ते सुहृदसून्साधवः । तदतिह्रेपणमकर्तव्यमप्येतदस्माकमवश्यकर्तव्यतामापतितम् । किं चान्यत्क्रियते । का चान्या गतिः । सर्वथा प्रयामि तस्याः सकाशम् । आवेदयाम्येतामवस्थाम् । इति चिन्तयित्वा कदाचिदनुचितव्यापारप्रवृत्तं मां विज्ञाय संजातलज्जो निवारयेदित्यनिवेद्यैव तस्मै तस्मात्प्रदेशात्सव्याजमुत्थाया-

गतोऽहम् । तदेवमवस्थिते यदत्रावसरप्राप्तमस्य चानुराग सदृशमस्मदागमनस्य चानुरूपमात्मनो वा समुचितं तत्र प्रभ भवती । इत्यभिधाय किमियं वक्ष्यतीति मन्मुखासक्तदृष्टिस्तूष् मासीत् ।

अहं तु तदाकर्ण्य सुखामृतमये ह्रद इव निमग्ना तत्काल जातया लज्जया किंचिदवनम्यमानवदनत्वादस्पृष्टकपोलोदरैरान बाष्पजलबिन्दुभिरावेद्यमानप्रहर्षप्रसरा तत्क्षणमचिन्तयम् । दि तावदयमनङ्गो मामिव तमप्यनुबध्नाति । यत्सत्यमनेन मे संता ताप्यंशेन दर्शितानुकूलता । यदि च सत्यमेव तस्येदृशी दशा किमिव नोपकृतमनेन किं वा नोपपादितम् । को वानेन समानो बन्धुः । कथं वा कपिञ्जलस्य स्वप्नेऽपि वितथा भ प्रशान्ताकृतेरस्माद्वदनान्निष्क्रामति । इत्थंभूते किं मयापि प्र पत्तव्यम् । तस्य वा पुरः किमभिधातव्यमिति । एवं वि चिन्त्या एव प्रविश्य ससंभ्रमा प्रतीहारी मामकथयत् । दारिके त्वमसुस्थशरीरेति परिजनादुपलभ्य महादेवी प्राप्ते तच्च श्रुत्वा कपिञ्जलो महाजनसंमर्दभीरुः सत्वरमुत्थाय पुत्रि महानयमुपस्थितः कालातिपातो भगवांश्च भुवनत्रयचूडाम रस्तमुपगच्छति दिवसकरस्तद्गच्छामि सर्वथाभिमतसुहृत् रक्षादक्षिणार्थमयमुपरचितोऽञ्जलिरेष मे परमो विभव इ धाय प्रतिवचनकालमप्रतीक्ष्यैव पुरोयायिनाम्बायाः प्र प्रतीहारीजनेन सर्वतः संरुद्धे द्वारदेशे कथमप्यत्रासनिर्गमः अम्बा तु मत्समीपमागत्य सुचिरं स्थित्वा स्वभवनमया तया तु तत्रागत्य किं कृतं किमभिहितं किमाचेष्टितमिति शू सर्वं नालक्षयम् ।

गतायां च तस्यामस्तमुपगते भगवति हारीतहरितवाजिनि सवितरि तिमिरेणावष्टभ्यमाने जीवलोके किंकर्तव्यतामूढा तामेव तरलिकामपृच्छम् । अयि तरलिके कथं न पश्यसि दृढमाकुलं मे हृदयमप्रतिपत्तिविह्वलानि चेन्द्रियाणि । न स्वयमण्वपि कर्तव्यमलमस्मि ज्ञातुम् । उपदिशतु मे भवती यदत्र सांप्रतम् । अयमेवं त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः । यदि तावदितरकन्यकेव विहाय लज्जामुत्सृज्य धैर्यमुन्मुच्य विनयमचिन्तयित्वा जनापवादमतिक्रम्य सदाचारमुल्लङ्घ्य शीलमवगणय्य कुलमङ्गीकृत्यायशो रागान्धवृत्तिरननुज्ञाता पित्राननुमोदिता मात्रा स्वयमुपगम्य ग्राहयामि पाणिमेवं गुरुजनातिक्रमादधर्मो महान् । अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृत्युमङ्गीकरोम्येवमपि प्रथमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्तत्रभवतः कपिञ्जलस्य प्रणयप्रसरभङ्गः । पुनरपरं यदि कदाचित्तस्य जनस्य मत्कृतादाशाभङ्गात्प्राणविपत्तिरुपजायते तदपि मुनिजनवधजनितं महदेनो भवेदिति । एवमुच्चारयन्त्यामेव मय्यासन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन वसन्तवनराजिरिव कुसुमरजसा धूसरतां वासवी दिगयासीत् ।

अथ रजनीकरमुदितं विलोक्यान्तर्जनितमदनानलाप्यन्धकारितहृदया तत्क्षणमचिन्तयम् । एकत्र खलु मदनमधुमासमलयमारुतप्रभृतयः समस्ताः । एकत्र चायं पापकारी चन्द्रहतको न शक्यते सोढुम् । इदमतिदुर्विषहमदनवेदनातुरं च मे हृदयम् । इत्येवं विचिन्तयन्तीमेव चन्द्रोदयोपनीता कमलवनम्लानिनिद्रेव मूर्छा मां निमीलितलोचनामकार्षीत् । अचिरेण च संभ्रान्ततरलिकोपनीताभिश्चन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलब्धसंज्ञा ता-

मेव रुदन्तीं तरलिकामपश्यम् । उन्मीलितलोचनां च मां कृतपादप्रणामा चन्दनपङ्कार्द्रेण करयुगलेन बद्धाञ्जलिरवादीत भर्तृदारिके किं लज्जया गुरुजनापेक्षया वा प्रसी प्रेषय माम् । आनयामि ते हृदयदयितं जनम् । उत्ति स्वयं वा तत्र गम्यताम् । अतःपरमसमर्थासि सोढुमि मकरचिन्हम् । इत्येवंवादिनीं तामहमवोचम् । उन्मत्ते मन्मथेन । नन्वयमागत एव मृत्योस्तस्यैव वा सकाशं ने कुमुदबान्धवः । तदुत्तिष्ठ यथा कथंचिदनुद्गतजीविता संभावया हृदयदयितमायासकारिणं जनम् । इत्यभिदधाना मद मूर्च्छाखेदविह्वलैरङ्गैः कथंचिदवलम्ब्य तामेवोदतिष्ठम् ।

उच्चलितायाश्च मे दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं लो नम् । उपजातशङ्का चाचिन्तयम् । इदमपरं किमप्युपक्षि दैवेनेति । अथ नातिदूरोदितेन चन्द्रमण्डलेनाप्लाव्यमा ज्योत्स्नया भुवनान्तराले तया कण्ठस्थिताक्षमालया श्रवणशिखर चुम्बिन्या च पारिजातमञ्जर्या रक्तांशुकेन कृतशिरोवगुण्ठन केनचिदात्मीयेनापि परिजनेनानुपलक्ष्यमाणा तस्मात्प्रासादशिखरा दवातरम् ।

अवतीर्य च पारिजातकुसुममंजरीपरिमलाकृष्टेन रिक्ती कृतोपवनेन मधुकरजालेनानुबध्यमाना प्रमदवनपक्षद्वा निर्गत्य तत्समीपमुदचलम् । प्रयान्ती च तरलिकाद्वितीयम जनमात्मानमालोक्याचिन्तयम् । प्रियतमाभिसरणप्रवृत्त जनस्य किमिव कृत्यं बाह्येन परिजनेन । नन्वेत एव परिज लीलामुपदर्शयन्ति । तथाहि समारोपितशरासनासक्तसायक नुसरति कुसुमायुधः । दूरप्रसारितकरः करमिव कर्षति शशी

स्खलनभयात्पदे पदेऽवलम्बते रागः । लज्जां पृष्ठतः कृत्वा रः सहेन्द्रियैर्धावति हृदयम् । निश्चयमारोप्य नयत्युत्कण्ठेति । काशश्चावदम् । अयि तरलिके अपि नाम मामिवायमिन्दुहतकमपि किरणकचग्रहाकृष्टमभिमुखमानयेत् । इत्येवंवादिनीं मामसौ विहस्याब्रवीत् । भर्तृदारिके मुग्धासि । किमस्य न जनेन । अयमात्मनैव तावन्मदनातुर इव भर्तृदारिकायां स्ताश्चेष्टाः करोति । एतैश्चान्यैश्च तत्कालोचितैरालापैस्तया ह तमुद्देशमभ्युपागमम् । तत्र च मार्गलताकुसुमरजोधूसरं रणयुगलं कैलासतटाच्चन्द्रोदयस्रुतचन्द्रकान्तमणिप्रस्रवणे क्षालयन्ती यस्मिन्प्रदेशे स आस्ते तस्मिन्नेव चास्य सरसः श्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तमुपालक्षम् । दक्षिणेक्षणस्फुरणेन च प्रथममेव मनस्याहितशङ्का तेन तरामवदीर्णहृदयेन किमप्यनिष्टमन्तः कथयतेव विषण्णेनान्तत्मना तरलिके किमिदमिति सभयमभिदधाना वेपमानगात्रयष्टिदभिमुखमतित्वरितमगच्छम् ।

अथ निशीथप्रभावाद्दूरादेव विभाव्यमानस्वरमुन्मुक्तार्तनादं हतोऽस्मि हा दग्धोऽस्मि हा वञ्चितोऽस्मि हा किमिदमापतितं कं वृत्तमुत्सन्नोऽस्मि । दुरात्मन्मदनपिशाच पाप निर्घृण किमिदकृत्यमनुष्ठितम् । आः पापे दुष्कृतकारिणि दुर्विनीते महाश्वेते नेन तेऽपकृतम् । आः पाप दुश्चरित चन्द्रचाण्डाल कृतार्थोऽसीदानीम् । अपगतदाक्षिण्य दक्षिणानिलहतक पूर्णास्ते मनोः । कृतं कर्तव्यम् । वहेदानीं यथेष्टम् । हा भगवञ्श्वेतकेतो त्सल न वेत्सि मुषितमात्मानम् । हा धर्म निष्परिग्रहोऽसि । पो निराश्रयमसि । हा सरस्वति विधवासि । हा सत्यानाथ-

मसि । हा सुरलोक शून्योऽसि । सखे प्रतिपालय माम् । अहमपि भवन्तमनुयास्यामि । न शक्नोमि भवता विना क्षणमप्यवस्थातुमेकाकी । कथमपरिचित इवादृष्टपूर्व इवाद्य मामेकपद उत्सृज्य प्रयासि । कुतस्तवेयमतिनिष्ठुरता । कथय त्वद्दते क गच्छामि। शून्या मे दिशो जाताः । तदुत्तिष्ठ देहि मे विलपतः प्रतिवचनम् । क तन्ममोपरि सुहृत्प्रेम । क सा स्मितपूर्वाभिभाषिता च । इत्येतानि चान्यानि च विलपन्तं कपिञ्जलमश्रौषम् ।

तं च श्रुत्वा पतितैरिव प्राणैर्दूरादेव मुक्तैकताराक्रन्दा सरस्तीरलतासक्तित्रुट्यमानांशुकोत्तरीया यथाशक्ति त्वरितैरज्ञातसमविषमभूमिभागविन्यस्तैः पादप्रक्षेपैः प्रस्खलन्ती पदे पदे केनाप्युत्क्षिप्य नीयमानेव तं प्रदेशं गत्वा सरस्तीरसमीपवर्तिनि शिशिरशीकरासारस्राविणि शशिमणिशिलातले विरचितं शयनमधिशयानं कपिञ्जलेन मद्दर्शनादब्रह्मण्यमित्यूर्ध्वहस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तं तत्क्षणविगतजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा काहमगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन्क्षणे केन हेतुना नोद्गच्छन्ति स्म तदपि न ज्ञातवती । केवलमतिचिराल्लब्धचेतना दुःखभागिनी वन्हाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम् । अश्रद्दधाना चासंभवनीयं तत्तस्य मरणमात्मनश्च जीवितमुत्थाय हा हा किमिदमुपनतमिति मुक्तार्तनादा हा अम्ब हा तात हा सख्य इति व्याहरन्ती हा नाथ जीवितनिबन्धनाचक्ष्व क मामेकाकिनीमशरणामकरुण विमुच्य यासि । पृच्छ तरलिका